सारदाविनोदे

वैयाकरणसिद्धान्तकौमुद्याः

तद्धिते अपत्यप्रकरणम् ।

BHATTOJI DIKSHITA'S

SIDDHANTA-KAUMUDI

Vol. III—Part I

(TADDHITA—APATYADHIKARA)

With English Translation and Sanskrit Commentar

BY

KUMUDRANJAN RAY, M.A., Ph.D(H),

Bhishagacharyya.

Re. २/८

CORRECTION

Page 7, line 21, for "The word लोमन् final elides its affix अ' when many etc." read "The word लोमन् final elides its affix इञ् but then the affix 'अ' comes in place of it when many etc."

[N. B.—Thus उडुलोमन् + इञ् = औडुलोमिः in singular, औडुलोमी in dual but in plural इञ् is replaced by the affix अ ; then उडुलोमन् + अ = उडुलोमाः with टिलोप by the rule "नस्तद्धिते"। See also our vol. I. Part II. p. 78].

"त्वत्प्रीत्यर्थं सरस्वतीविनोदं कुर्मः"—पञ्चतन्त्रम्

सारदाविनोदे

श्रीमद्भट्टोजिदीक्षितविरचितायाः

वैयाकरणसिद्धान्तकौमुद्याः

(पूर्वार्द्धे—तद्धितप्रकरणम्)

श्रीकुमुदरञ्जन भिषगाचार्येण

कृतभाषान्तरः तत्कृतया मितभाषिणीसमाख्यया व्याख्यया च समेतः

BHATTOJI DIKSHITA'S

SIDDHANTA-KAUMUDI

Vol. III – Pt. I.

(TADDHITA—APATYADHIKARA)

With English Translation and Sanskrit Commentary

BY

KUMUDRANJAN RAY, M.A., Ph.D(H),
Bhishagacharyya.

Author of Evolution of Gita, Philosophy of Ayurveda,
Meghadutam, Laghu-Kaumudi, &c.

Re. 1/-

Published by K. Ray
7, Bhawani Datta Lane,
Calcutta.

Printed by R. N. Mitı
at the Nalanda Press,
112, Vivekananda Road, Calc

PREFACE

We have said much about Panini, the grammarian in our Part IV (Bhwadi) and much about Astadhyayi and the evolution of early grammatical thoughts and their culmination into Siddhanta Kaumudi in Vol I part I (Sandhi); hence here we won't say anything more.

But here we give a few slokas written by late Saradaranjan Ray, my father to show to our admirers that apart from being a mathematician, a Homoeopath, a grammatical scholar in Panini, he was well-versed in Sanskrit Kavyas and Dramas and himself a poet.

This part contains Taddhita (Apatyadhikara only)—the rest will be out next June.

cutta
, 1938.

Kumud Ranjan Ray

Ar hilo

Errata on Vol I, Part II

(*Of Siddhanta-Kaumudi*)

P. 26, Sutra 211, line 14 for "इण् च कुश्च इति समाहारद्वन्द्वः। एकवचनमार्षम्" read "इण् च कुश्च इति समाहारद्वन्द्वः। पुंस्त्वमार्षम्। इतरेतरयोगे तु एकवचनम् आर्षम्"।

P. 52. line 22, for "having an affix" read "having a case affix".

P. 68' line 14, for "अध्याहारपरशब्दयोगेप्रथमा" read "अध्याहार-परशब्दयोगे पञ्चमी"।

P. 321, line 1, for "पुंयोगादाख्याम्" read "पुंयोगादाख्यायाम्"।

P. 341, line 16, for "वैयाकरणसिद्धान्तकौमुद्याः" read "वैयाकरण-सिद्धान्तकौमुदीव्याख्यायाः"।

P. 113. Sutra 302, for "राऽम्शसोः" read "वाऽम्शसोः"।

[N. B.—Also see "*errata*" at the end of Siddhanta-Kaumudi Vol IV].

Vol.—IV.

P. 102, line 17, for "लि (?) ललुङ् स्यात्" read "लिः (?) लुक् स्यात्"।

(Written by late Principal Ray on the occasion of His Majesty late George the Fifth's arrival in India).

गाथापञ्चदशी

A COLLECTION OF FIFTEEN SONGS

देशे देशे पर्वते पर्वते च ग्रामे ग्रामे कानने काननेऽपि ।
गेहे गेहे घोष्यतामद्य वार्त्ता भूयः प्राप्तो भूतलं रामचन्द्रः ॥१॥

In every country, on every hill top, in every village, in every forest and from house to house let the news be proclaimed that Ramachandra has come back to Earth. (1).

धन्या नूनं यातयामापि दिल्ली पूर्णानन्दो यत्र पुण्ये मुहूर्त्ते ।
सर्वत्यागी लोकहेतोः ससीतो भूयः प्राप्तो भूतलं रामचन्द्रः ॥२॥

Lucky indeed is Delhi though her days are long past—Delhi where, at an auspicious moment, The Blissful Ramachandra, who had renounced all for the sake of the people, has come back to Earth along with Sita. (2).

पूर्वं योऽसौ गोप्रतारं प्रविष्टः स्वाधिष्ठाने लोकसाक्षी परस्तात् ।
सोऽयं साक्षात् सज्जते लोककृतेऽत्र राजा रामो जर्जरूपो नुमस्तम् ॥३

King Rama, who, in the days of yore, had entered the stream at Gopratara and then at his own abode had stayed watching the events of the world, is now, in the shape of King George, making a personal effort for the sake of the people. Him we adore. (3).

प्राग्भर्त्तारं स्वेच्छयानुव्रजन्ती सीता क्रान्ता भारतप्रान्तमात्रम् ।
तीर्णा सेयं सप्तपाथोधिपूरं भर्त्तुः कार्य्ये मेरिसंज्ञा नुमस्ताम् ॥४॥

Sita, in bygone times, following her lord, of her own accord, had crossed merely the boundary of Bharatavarsha; but now, in the person of Queen Mary, she has crossed the seven seas for the sake of her lord. Our obeisance to her (4).

सत्यं दृष्टौ नैव तौ दम्पती नः सन्तुष्यामो वार्त्तया तन्महिम्नः ।
भक्तः पश्यन्नेव लक्ष्मीनृसिंहौ सद्यो मुक्तः स्थातुमत्रोत्सहेत ॥५॥

It is true the Royal Pair is an unseen entity to us, and we have to rest satisfied with a mere report of the majesty of their prowess. This is as it should be, for, the devoted, after having had a direct vision of Lakshmi and Nrisimha, is forthwith emancipated and cannot stay in this world even for a moment. (5).

कस्ते स्तूयात्तं प्रभावं नरेन्द्र ! आश्चर्यं तद् यद्व्यधायि त्वयेदम् ।
आज्ञामात्रं प्राणयोगो मुमूर्षोर्धन्वप्राये राजधानी समृद्धा ॥६॥

O Lord of Men, who can sufficiently belaud the majesty of thy prowess? What thou hast accomplished is truly astonishing. At your command the dying have come back to life, and what was all but a desert has been turned into a prosperous seat of Government. (6).

यद्येतस्मिन्निन्दकाः सन्ति सन्तु तेषामर्थे नैष ते देव यत्नः ।
भानुः शश्वद्धन्ति नैशं तमिस्रं गोमायूनां प्रीतये तत् कथं स्यात् ॥७

Detractors in this matter may be let alone. Thou art not exerting thyself to-day for their sake. The sun dispels the nightly gloom, but how can that be to the delight of the jackal? (7).

ये तु प्राज्ञा विप्रवादं प्रपन्ना नोदर्कस्तैः सम्यगालोचितोऽस्मिन् ।
दोषस्तेषां नैष मर्त्याः, परन्तु सर्वः सर्वं नेह पश्यत्यशेषम् ॥८॥

But those wise people who have expressed disapprobation, surely, have not carefully considered the consequences of this step. This is no detraction to their wisdom, for, every one cannot see everything that is happening or will happen in this world. (8).

कालीघाटा मायिनी राजभोग्या त्यक्ता ऋज्वी प्राप्तपूर्वापि मुम्बा ।
एवं गूढ़ं विद्विषन्मद्रराजोऽनैषीत् कालं रोषकालाननश्रीः ॥९॥

"Wily Calcutta is the Royal mistress, while plain Bombay is ignored though first reached"—Thus spiting inwardly has Madras been spending his days with his face blue through rage. (9).

एकं तावत् सौमनस्यं पुरीणां मानार्हाया माननञ्च द्वितीयम् ।
केन्द्रे स्थित्वा सूक्ष्मसौच्चा समन्ताद्दिल्लीवासे सिद्धमेतत्त्रयं हि ॥१०॥

The mutual good will of the cities, the honouring of her that deserves honour, a sharp scrutiny all round from the centre—all these three are indeed secured by having the seat of Government at Delhi. (10).

आस्तामेतच्चर्चया किं कृतं स्यान्नीतिर्ध्याता सुप्रयुक्ता दुरूहा ।
आज्ञा राज्ञः सर्वथा वन्दनीया युक्तायुक्ता नो विचार्य्या प्रजानाम्॥११

Be that as it may ; discussion is futile. It is difficult to rate at its true worth an administrstive measure that is well thought out and well executed. A loyal subject has to bow down before the king's mandate and must not discuss its merits (11).

मन्ये यत् स्तात् साम्प्रतं न स्तदेवादिच्चद्देवो मन्त्रिणश्चान्वतिष्ठन् ।
हृष्टा लोकास्तोषितौ मन्त्रिमुख्यौ तत् प्रीयेतां राजजायापती च ॥१२

Methinks what His Majesty has ordained his ministers have arranged for *must* be for the people's good. The people are gratified, the two excellent ministers are pleased ; so may the Royal Pair be plesed too. (12).

द्वीपे द्वीपे तावकी राजपूजा पूजां पूजामन्तरा कार्य्यचिन्ता ।
व्यासक्तत्वेऽप्यस्य देशस्य राजन्नध्येषि त्वं तेन वर्द्धामहेऽद्य ॥१३॥

Sire, from land to land royal welcome reaches thee, and the intervals between the fetes are taken up by state deliberations. Though thus busy, thou art graciously pleased to think of India. To this we owe our salvation to-day. (13).

तत्ते चित्तं देवदेवे स्थिरं स्यान्मा त्वां प्रापद्रोगशोकातिपातः ।
इष्टादिष्टं गच्छ विघ्नान् विधूय मा ते चैषीद्भारतीया सपर्य्या ॥१४॥

May thy heart remain fixed upon the God of Gods; may visitations of disease and disaster keep away from thee; may blessings follow blessings unto thee overcoming all difficulties; may India's homage continue with unabated fervour. (14).

देवी भर्त्तुः सा च कल्याणकामा लक्ष्मीः साक्षादच्युतं व प्रपन्ना ।
प्रीता तिष्ठेतास्मदीयेषु नित्यं मैनां ह्रासीद्भारतीया नमस्या ॥१५॥

May her Imperial Majesty, ever watchful over the welfare of her lord, like Lakshmi herself united to Vishnu, always take counsel with ministers favourably disposed towards us, and may India's worship of her continue uninterrupted. (15).

गाथापञ्चदशीं नृपेन्द्रचरितध्यानप्रमोदोद्भवां
मार्गेऽष्टाह्निमिते दिने व्यरचयत् श्रीसारदारञ्जनः ।
आशास्ते स च तस्य राजभिषजः सन्धानबन्धोर्गुणै-
र्वङ्गान् भङ्गजुषोऽभिषिच्य वहतादानन्दमन्दाकिनी ॥

This collection of fifteen songs originated in the joy derived from meditating [illegible] of the king of kings. Saradaranjan has composed it to-day the 28th day of Agrahayana (Dec. 14), and he prays that, by the excellencies of that Royal Surgeon who promotes re-union, may a veritable Ganges of bliss flow across Bengal that is suffering from fracture.

सिद्धान्तकौमुदी।

"ओम्"

वन्दे चैतन्यदेवं तं निष्कलङ्कं यदिच्छया।
सलीलं वर्त्तते चित्रं लेखभूमौ जडोऽप्ययम्॥

अथ तद्धितप्रकरणम्।

अपत्यादिविकारार्थ-साधारणप्रत्ययाः।

१०७२। समर्थानां प्रथमाद्वा। ४।१।८२॥

दी—। इदं पदत्रयम् अधिक्रियते। "प्राग् दिशः—" (५।३।१, सूत्र—१९४७) इति यावत्। सामर्थ्यं परिनिष्ठितत्वम्। कृत-सन्धिकार्य्यत्वम् इति यावत्।

All the three words 'समर्थानाम्', 'प्रथमात्', and 'वा' go up to i.e. attach in all the sutras up to the sutra 'प्राग्दिशो विभक्तिः' (No. 1947)—i.e. when several words are here syntactically connected in the senses of "तस्य अपत्यम्", "तेन रक्तं रागात्" and "तत्रभवः" etc.. then the affix in question will be optionally (वा) attached to the first समर्थ word (समर्थानां प्रथमात्); in other words of the syntactically connected words here the entire first word is to be taken as the stem (प्रकृति) to which an affix (प्रत्यय) is to be attached. Thus in उपगोः अपत्यम्, which are syntactically connected (i.e. which have interdependence व्यपेक्षा) the अपत्यप्रत्यय

is to come to the entire first word उपगु। So उपगु + अण् = औपगव and so on. And this अधिकार of words is to go before स्वार्थिक-प्रत्यय commencing with—"प्रागदिशो विभक्तिः"। In other words the whole षष्ठ्यन्त words &c, in these cases will take the affix and never the प्रथमान्त words. Owing to अधिकार of "वा" here, optionally the whole वाक्य as उपगोः अपत्यम् may be used. Now it may be argued that in उपगोः अपत्यम् &c., the तद्धितवृत्ति may bar समासवृत्ति, it is so no doubt; but this bar is optional owing to the अनुवृत्ति of the word अन्यतरस्याम् from the immediately prior sutra which is "दैवयज्ञि-शौचवृक्षि-सात्यमुग्रि-काण्ठेविद्धिभ्योऽन्यतरस्याम्" (४।१।८१)। उपग्वपत्यम् in the sense of उपगोः अपत्यम् is also thus optionally correct.

Now Bhattoji here explains the word समर्थ (and सामर्थ्य) by sayinng "सामर्थ्यम् परिनिष्ठितकार्यत्वम्" i.e. by समर्थ we are to understand here as शक्त (able), and सामर्थ्य will then mean ability in the matter of producing a कार्य्य i. e. a meaning here in the matter of शब्द, and this is possible by placing the words in conjunction to produce one whole stem, hence Bhattoji further adds "कृतसन्धिकार्यत्वमिति यावत्"। Thus acc. to him the resultant here is—that सामर्थ्य is interdependence by way of placing the words in conjunction or in contiguity (कृतसन्धिकार्यत्वं सामर्थ्यम्)। And in such सन्धिकार्य्य of words, the entire first is to take the affix as said before. See also under the rule "तस्यापत्यम्" (infra).

मितभाषिणी—। अत्र सूत्रे—'समर्थानां', 'प्रथमात्', 'वा'—इति पदत्रयम् वर्त्तते। एतत् पदत्रयम् "प्राग् दिशो विभक्तिः" इति सूत्रं यावत्, तस्यापत्याद्यर्थे एव

इत्यर्थः अधिक्रियते। स्वार्थिकेषु अस्याधिकारस्य उपयोगो नास्ति, विकल्पोपि तत्रान-वस्थितः—केचित् नित्यमेव भवन्ति। 'तस्यापत्यम्', 'तत्रभव' इत्याद्यर्थे अस्य अधिकारो वर्त्तते एव। सूत्रस्य अर्थोयथा—'समर्थानां' अर्थयुक्तसम्बन्धानां शब्दानां मध्ये (समर्थाना-मितिनिर्द्धारे षष्ठी)—प्रथमात् प्रथमोच्चारितात् प्रत्ययो वा भवति। ततः प्रथमा इति "तस्यापत्यम्" इत्यादि सूत्रे प्रथमोच्चारितं पदम्। ननु तद्धितः (तद्धितं वा) सुबन्तादेव भवति, ततः तस्य पदविधितया, "समर्थः पदविधिः"(A) इति सूत्रेणैव (समासे द्रष्टव्यम्) एकार्थीभावादिरूपसामर्थ्यलाभात्, किं पुनः अत्र सामर्थ्यग्रहणं कृतम्? अतः आह—अत्र 'समर्थः' न केवलं सापेक्षः अपि तु शक्त एव। शब्दस्य 'शक्तत्वञ्च' अर्थविशेषोत्पादनयोग्यत्वम्। तच्च योग्यत्वम् सापेक्षशब्दानां कृतेषु सन्धिषु घटते। अतः आह 'सामर्थ्यं परिनिष्ठितत्वम्' कार्योत्पादनयोग्यत्वम् इत्यर्थः; अपुरितुष्यन् अर्थं च समधिकं स्फुटीकरिष्यन् पुनः आह—"सामर्थ्यं कृतसन्धिकार्यत्वम् इति यावत्"। कृतसन्धि-कार्यत्वम् चात्र सामर्थ्य, यतः सन्धौ हि 'सामर्थ्य' साकाङ्क्षतादि स्पष्टमुपलभ्यते। तच्च षष्ठ्यन्तादिशब्दानां शब्दान्तरेण च सम्बन्धः एव इत्यर्थः, यथा उपगोः वा सूत्थितेः अपत्यम्, इत्यादि; अतोत्र काशिकायाम् उक्तम्—"समर्थानाम् किम्? कम्बल उपगो-रपत्यं देवदत्तस्य। प्रथमादिति किम्? षष्ठ्यन्तात् यथास्यात् प्रथमान्तात् मा भूत्"। एवं सति विकल्पेन सुबन्तात् तद्धितोत्पत्तिः स्यात्। पक्षे वाक्यमपि यथा स्यात्—उपगोः अपत्यमिति॥ यद्येवं—समासवृत्तिः तद्धितवृत्त्या बाध्येत इति चेत्? नैष दोषः। किन्तु पूर्वसूत्रात् "अन्यतरस्याम्"—ग्रहणानुवृत्तेः "उपगोः अपत्यम्" इत्यत्र "उपग्व-पत्यम्" इति समासोपि वा स्यात्।

केचित्तु सूत्रे "समर्थानाम्" इति बहुवचनग्रहणम् नानुमोदन्ते। तेषां मते "समर्थात् प्रथमाद्वा" इत्येव सुवचम्। किन्तु 'उपगोः अपत्यम्" इत्यादि स्थले एकाधिकशब्दसमवाये बहुविधेचार्थे सति तद्धितोत्पत्तिर्यथा स्यात् तथा "समर्थानाम्" इति बहुवचनग्रहणं सार्थकम् कृतम्।

"A"—'समर्थः पदविधिः' इति सूत्रे द्विविधं सामर्थ्यं गृहीतम्। यथा—(१) पदानाम् आकाङ्क्षावशात् परस्परान्वयरूपं व्यपेक्षाख्यं सामर्थ्यम्॥ (२) पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम् सामर्थ्यमेव एकार्थीभावलक्षणम्।

१०७३ । प्राग्दीव्यतोऽण् । ४।१।८३ ॥

टी— । "तेनदीव्यति—" (सूत्र १५५०) इत्यतः प्राक् अण् अधिक्रियते ।

The affix अण् goes up to the sutra "तेन दीव्यति खनति जयति जितम्" (Pan 4. 4. 2). That is "तेन दीव्यति" enjoins ठक्, and अण् is to pervade all rules up to that one, in the senses of "तस्य अपत्यम्", "तेन रक्तम्" &c.

मित— । अत्र सूत्रे—"तेन दीव्यति—" इति सूत्रैकदेशस्थदीव्यत् शब्दं विधाय संगृह्य च प्रागदीव्यत इति प्रातिपदिको विहितः । तस्मात् 'समर्थानां शब्दानां मध्ये प्रथमात् तद्धितप्रत्ययो भवति' इति उक्त्वा, अधुना—तस्मादेव "तस्यापत्यम्", "तेन रक्तम्—" "तत्रभवः", 'तस्येदम्" इत्याद्यर्थे—"तेन दीव्यतिखनति जयति जितम्" इति सूत्रात् प्राक्पर्य्यन्तम् 'अण्'—प्रत्ययः अधिकृतः वर्त्तते । फलतस्तु अणप्रत्यय औत्सर्गिकः सर्वत्र गच्छति, किन्तु यत्र इञादिविशेषप्रत्ययोऽपवादभूतोऽभिधीयते तत्र अण् नोपतिष्ठते ।

१०७४ । अश्वपत्यादिभ्यश्च । ४।१।८४ ॥

टी— । एभ्यः अण् स्यात् प्राग्दीव्यतीयेषु अर्थेषु । वक्ष्यमाणस्य ण्यस्य अपवादः ।

The senses e. g. तस्यापत्यम्, तेन रक्तम्, तत्रभवः, तस्येदम् etc., that are enumerated here up to the sutra "तेन दीव्यति—" are called प्राग्दीव्यतीय अर्थ । Now in these प्राग्दीव्यतीय अर्थ, words of the अश्वपति class take अण्, this अण् bars the affix "ण्य" that is due hereby the rule "दित्यदित्यादित्य—पत्युत्तरपदात्ण्यः" and अश्वपति ends in पति as उत्तरपद ।

मित— । "प्राग्दीव्यतोण्" इति सूत्रमत्रानुवर्त्त्य (अनुकृष्य इत्यर्थः) आह— "एभ्यः अण् स्यात् प्राग्दीव्यतीयेषु अर्थेषु" । "प्राग्दीव्यतोण्" सूत्रात् आरभ्य

"तेन दीव्यति—" सूत्रं यावत् ये अपत्यादि— चौत्रिकाद्यर्थाः विहिताः ते सर्वेऽपि प्राग्दीव्यतीयाः अर्थाः। [दीव्यतः प्राक् इति प्राग्दीव्यत् "अपपरिबहिरञ्चवः पञ्चम्या" इत्यव्ययीभावः। ततो भवार्थे" वृद्धाच्छः" इति छप्रत्यये कृते प्राग्दीव्यतीय-शब्दः लभ्यते]। एषु अर्थेषु अश्वपत्यादिभ्यः अण् स्यात्, न तु पत्युत्तरपदत्वात् (सूत्र १०७७) ण्य-प्रत्ययो भविष्यति, अतः आह—"वक्ष्यमाणस्य ण्यस्यापवादः"॥ अश्वपत्यादिगणो यथा—अश्वपति, स्थानपति, ज्ञानपति, यज्ञपति, बन्धुपति, शतपति, धनपति, गणपति, राष्ट्रपति, कुलपति, गृहपति, पशुपति, धान्यपति, धर्मपति, धन्वपति, सभापति, प्राणपति, क्षेत्रपति॥ अधुना अश्वपति+अण् इति स्थिते आह—

१०७५। तद्धितेष्वचामादेः। ७।२।१७॥

टी—। ञिति णिति च तद्धितपरे अचामादेरचो वृद्धिः स्यात्॥

वृद्धि is ordered of the first vowel of a word when Taddhita affix having indicatory ञ् or ण् follows. Thus अश्वपति+अण् is to give first अश्वपत्+अण् by the rule "यस्येति च" (see under Vol I sutra 311), ; now by the present sutra we get आश्वपत with वृद्धि of the first vowel in अश्वपत्।

मित—। "अचोञ्णिति" इति सूत्रमनुवर्त्तते। "मृजेर्वृद्धिः" इति सूत्रात् "वृद्धिः" वर्त्तते। "अचाम्" इति निर्द्धारे षष्ठी। ततः आह—"ञितिणिति च तद्धितपरे अचां मध्ये आदेः अचो वृद्धिः स्यात्"। अश्वपति+अण् इति "यस्येतिच" सूत्रेण इकारलोपे अश्वपत्+अण् इति जाते, वर्त्तमानसूत्रेण वृद्धौसत्याम् अश्वपत्+अण् = आश्वपतम् इति स्थितम्।

१०७६। किति च। ७।२।११८॥

टी—। किति तद्धिते च तथा (आदेरचो वृद्धिः स्यात्)॥ अश्वपतेरपत्यादि आश्वपतम्। गाणपतम्। "गाणपत्यो मन्त्रः" इति प्रामादिकमेव।

to follow. Thus गोः आगतम् = गव्यम् (with यत् in supercession of अण्); why do you say अजादिप्रसङ्गे here ? Witness गोभ्यः हेतुभ्यः आगतम् इति गोरूप्यम् and गोमयम् ; here the affix is रूप्य and मयट by "हेतुमनुष्येभ्योऽन्यतरस्याम्" and "मयड् वैतयोः—गोश्च पुरीषे" &c. and in these cases there being no occasion (प्रसङ्ग) of an अजादि affix यत cannot come in, and we get—गोरूप्यम् &c.

मित—। दिति, अदिति, आदित्य—पतिः उत्तरपदं यस्य तस्मात्—शब्दात् च ण्य-प्रत्ययो भवति प्राग्दीव्यतीयेषु अर्थेषु। "प्राग्दीव्यतोऽण्" इति अनुवर्त्तनप्राप्तम् अणं बाधित्वा ण्य एव स्यात्, अत आह—"अणोपवादः"। दिति + ण्य = दित् + ण्य ("यस्येति च" इति दितिशब्दस्य इकारलोपः) = दित् + य (ण-कार इत्) = दैत्यः (आदिवृद्धिः); एवम् आदित्यः, प्राजापत्यः इत्यादि। काशिकाग्रन्थे यमशब्दात् प्राग्दीव्यतीये अर्थे ण्यः विहितः। पृथिव्या अपत्यादि-अर्थे ञ-अञौ प्रत्ययौ भवतः। प्रत्यययोः स्त्रियामेव विशेषः इति दर्शयितुमाह—पार्थिवा (ञे सति अदन्तत्वात् टाप) —पार्थिवी (अञि सति "टिड्ढाणञ—" इति सूत्रेण ङीप्)। अत्रोक्ताः सर्वे प्रत्ययाः प्राग्दीव्यतीयेषु एव भवन्ति। देवस्य अपत्यादि अर्थे दैव्यम् (यञ्) —दैवम् (अञ्)। 'वहिस्' इति अव्ययात् यञ्, यञिसति अस्य टि-भागलोपश्च ततो वाह्यः इति। अत्र इदमवधेयम् "अव्ययानां भमात्रे टिलोपः'—इत्यस्य अनित्यत्वज्ञापनमिह टिलोपविधानफलम्, तेन आराद्भव इति आरातीय इत्यादि सिध्यति"—इति बालमनोरमा। वहिषः ईककि सति टिलोपः, "किति च" इति आदिवृद्धौ च "वाह्नीकः" इति॥ स्थामन्-शब्दात् प्राग्दीव्यतीये अर्थे अकारप्रत्ययो वक्तव्यः इत्यर्थः। अत्र "अश्वत्थामः" इत्युदाहरणात् भाष्येपि तथा स्थितत्वात् अत्र प्रत्ययविधित्वेपि तदन्तविधिर्वोध्यः। अश्वस्य इव स्थाम बलं (स्थितिर्वा) यस्य इति अश्वत्थामन्, पृषोदरादित्वात् 'स्थामन्' इत्यस्य सकारस्य तकारः स्यात्। ततः अप्रत्यये सति अश्वत्थामः इति। भवार्थे तु अकारप्रत्ययस्य लुग् वक्तव्यः— अश्वत्थामा इति॥ लोमन्शब्दात् उत्तरपदात् वहुषु अपत्येषु वाच्येषु—अकारः स्यात्, न तु बाह्वादिलक्षण इञ्, अत आह "बाह्वादि—इञोऽपवादः"।

उडुलोमन् + अ (बहुवचन) = उडुलोमाः ("नस्तद्धिते" इति टिलोपः) इत्यादि ॥ असत्यां बहुत्वविवक्षायां औडुलोमिः (इति बाह्वादि इञ्); अतः आह "बहुषुकिम्—औडुलोमिः" ॥ गो-शब्दात् अजादिप्रत्ययस्य प्रसङ्गे सति 'यत्' स्यात्। अत 'सर्वत्र'—ग्रहणं तु पूर्ववार्त्तिकस्यसम्प्राप्त्यर्थनिवारणार्थम् इति बोध्यम्, गविभवम् इति अजादिप्रत्यये अणि विहिते सति 'यत्'—ततः गव्यम् इति। असति अजादि-प्रत्यये, "हेतुमनुष्येभ्योऽन्यतरस्याम्" इतिरूप्यप्रत्यये, तथा "गोश्चपुरीषे" इतिमयटि च सति, प्रत्ययस्य अजादित्वाभावात् यत् न स्यात्, अत आह—"अजादि प्रसङ्गे किम् ? गोभ्य हेतुभ्य आगतम्—गोमयम्"। प्रत्ययस्य हलादित्वात् एतत्स्थाने वार्त्तिकवलेन 'यत्' न स्यात् ॥

१०७८। उत्सादिभ्योऽञ्। ४।१।८६ ॥

टी—। औत्सः। "अग्निकलिभ्यां ढक् वक्तव्यः" (वा)— अग्नेरपत्यादि—आग्नेयम्। कालेयम्।

The affix अञ् comes after words of the उत्सादि list in प्राग्दीव्यतीय senses. The words अग्नि and कलि however take ढक् yielding आग्नेय &c.

मित—। प्राग्दीव्यतोऽर्थेषु अर्थेषु इति वर्त्तते। ततः क्रमप्राप्तमणं बाधित्वा उत्सादिशब्देभ्यो अञ् स्यात्। उत्सादि यथा—उत्स, उदपान, विकिर विनद, महानद, महानस, महाप्राण, तरुण, तलुन, बष्कयासे (i. e., बष्कयशब्दः 'असे' असमासे सति अवपद्यते), धेनु, पृथ्वी, पङ्क्ति, जगती, त्रिष्टुप, अनुष्टुप, जनपद, भरत, उशीनर, ग्रीष्म, पीलु, कुण, उदस्थान देशे, पृषदंश, भल्लकीय, रथन्तर, मध्यन्दिन, बृहत्, महत्, सत्वत्, कुरु, पञ्चाल, इन्द्रावसान, उष्णिह, ककुभ, सुवर्ण, देव ; ग्रीष्मादयश्छन्दसि—इत्युत्सादि ॥ केचिदत्र 'पृथा'—शब्दमपि पठन्ति, तेन अञा 'पार्थ' भवति इत्याहुः ॥

कथं माध्यन्दिनमिति ? भाषायां तु "मध्योमध्यं दिनण् चास्मात्" इति मध्यशब्दात् भवार्थे दिनण् प्रत्यये, इहैव निपातनात् मध्यशब्दस्य 'मध्यम्'-भावे सति

सिध्यति इति। यद्वा—दिनस्य मध्यम् इति, ततः मध्यन्दिनम् उत्सादिगण-पाठात् निपातनात् सिद्धम्। पश्चात् भवाद्यर्थे अञि सति माध्यन्दिनम् इति एतां गणोक्तां 'ग्रीष्मादयच्छन्दसि' इति छान्दसप्रक्रियामपि केचित् भाषायां पठन्ति। अस्मिन् पक्षे एव—असति अञि, "मध्यन्दिने अर्धरात्रे वा" इत्यादि मनुप्रयोगः उपचारात् सङ्गच्छते, अन्यथा भाषायां (प्रथमपक्षे) मध्य + दिनण् = माध्यन्दिनम् इति ह्रियुक्तं स्यात्, यथा "माध्यन्दिनसवनाय तमस्मामनुप्रपन्नः" इति उत्तरे।

इत्यपत्यादिविकारान्तार्थ-साधारणाः प्रत्ययाः॥

अधुना अपत्याधिकारप्रकरणमाह—

१०७८। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्।४।१।८७॥

टी—। "धान्यानां भवने—" (१८०२) इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमात् नञ्-स्नञौ स्तः। स्त्रैणः, पौंस्नः। वत्यर्थे न; "स्त्रीपुंवच्च" (सूत्र ९३२) इति ज्ञापकात्—स्त्रीवत्, पुंवत्।

The words स्त्री and पुमस् respectively take the तद्धित affixes नञ् and स्नञ् after these in all the senses enumerated henceforth up to the sutra 'धान्यानां भवने"—No 1802. Thus स्त्री + नञ् = स्त्रैणः (with आदिवृद्धि), similarly पौंस्नः। But in the sense of the affix वति (comp. "तेन तुल्यं क्रिया चेद्वतिः") नञ् and स्नञ् do not come after these words, owing to the use of the word "स्त्री पुंवच्च" in the sutra (932) in—एकशेष (ante). Thus we get स्त्रीवत्, पुंवत्।

मिल—। स्त्री च पुमान् च इति "स्त्रीपुंसौ" द्वन्द्वः। "अचतुर-विचतुर—" इत्यादिसूत्रेण समासान्तः अच्। ताभ्याम्; स्त्रीशब्दात् पुमस्शब्दात् च इत्यर्थः। "प्राग्-दीव्यतोऽण्" इति सूत्रात् "प्राक्" अनुवर्त्तते। ततः आह—"धान्यानां भवने क्षेत्रे खञ्"

इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमात् नञ्—स्नञौ स्तः" । स्त्री + नञ = स्त्रैण (आदिवृद्धिः णत्वञ्च) । स्त्रिया अपत्यम्, तत्रभवः, तासां समूहः—इत्यादि हि अस्यार्थः ; एवं पौंस्न इति । "कथं स्त्रीत्वं स्त्रीता पुंस्त्वं पुंस्ता' इति । 'आ चत्वात्' इति चकाराद्धक्ष्यते" इति मनोरमा । अत स्नञि सति पुम्स् शब्दस्य पदत्वात् संयोगान्तलोपः, आदिवृद्धिश्च । "तेन तुल्यं क्रियाचेद्वतिः" इति सूत्रविहिते वत्यर्थे स्त्रीपुंशब्दाभ्यां नञ्-स्नञौ न स्तः । कथमेतत् ज्ञायते इत्यत्राह—एकशेषप्रकरणे "स्त्रीपुंवच्च" इति सूत्रे पुंवत् इति सूत्रकारेणैव व्यवहारात् एतत् ज्ञाप्यते, अन्यथा 'पुंवत्' इति निर्देशो व्यर्थः स्यात् । अस्य ज्ञापकस्य च सामान्यापेक्षत्वात् स्त्रीशब्दादपि वत्यर्थे नञ् न इति फलितम्—एकयोगे एकत्र दृष्टो न्यायः अन्यत्र प्रयुज्यते बाधकाभावात्, भाष्येऽपि तथा इङ्गितत्वात् ॥

१०८० । द्विगोर्लुगनपत्ये । ४।१।८८ ॥

दी । द्विगोर्निमित्तं यस्तद्धितः अजादिः अनपत्यार्थः प्राग्दीव्यतीयः तस्य लुक् स्यात् । पञ्चसु कपालेषु संस्कृतः पुरोडाशः = पञ्चकपालः ॥ 'द्विगोर्निमित्तम्' इति किम् ? पञ्चकपालस्येदं खण्डं पाञ्चकपालम् । 'अजादि' किम् ? पञ्चगर्गरूप्यम् । 'अनपत्ये' किम् ? द्वयोर्मित्रयोरपत्यं द्वैमित्रिः ।

The Taddhita affix which arises in the matter of a द्विगुसमास (i.e. which conveys the sense of द्विगु) and which begins with a vowel (अजादि) and which does not signify अपत्यार्थ and which has प्राग्दीव्यतीय senses,—elides. Thus we get पञ्चकपाल with elision of अण् done by the rule—"संस्कृतं भक्षाः" । Why do you say "द्विगोर्निमित्तम्" in the vritti ?—witness पाञ्चकपालम् with अण् in the sense "तस्येदम्" । This अण् being not in the matter of द्विगु i. e. here there being ho तद्धितार्थद्विगु, it does not elide. Why do you (or we) say "अजादिः" in the vritti ?—witness

पञ्चगर्गरूप्यम् in the sense पञ्चभ्यः गर्गेभ्यः आगतम्। Here there being occasion for तद्धितार्थ द्विगु, the affix still does not elide for it is not an अजादि affix. Why do you (or-we) say अनपत्ये in the vritti ? Witness द्वैमितिः in the matter of तद्धितार्थद्विगु ; here the affix does not elide, for the sense is अपत्य, whereas we want अनपत्यार्थ तद्धित here in the rule.

मित—। "द्विगोः" इति निमित्तसम्बन्धे षष्ठी, 'तद्धितस्य' इत्यनेन अन्वितम्। "तद्धितार्थोत्तरपद समाहारे च" इति सूत्रेणैव पूर्वं तद्धितविषये द्विगुरभिहितः एव। अत आह—"द्विगोर्निमित्तं यः तद्धितः तस्य लुक् स्यात्।" "प्राग्दीव्यत" इति वर्त्तते, ततः च वृत्तौ "प्राग्दीव्यतीयः" उक्तः। "गोत्रे लुगचि" इति उत्तरसूत्रात् "अचि" अपकृष्यते [उत्तरसूत्रात् पूर्वसूत्रे आकर्षणम् आनयनमेव अपकर्ष इति प्रागुक्तम्], तच्च षष्ठ्यन्तं सत् 'तद्धितस्य' इत्यस्य विशेषणम् ; अत आह— "यः तद्धितः अजादिः" इत्यादि॥ तद्धितविषये द्विगोः उदाहरणं यथा—पञ्चसु कपालेषुसंस्कृतः पुरोडाशः इति "संस्कृतं भक्षाः" इतिसूत्रेण तद्धितार्थद्विगुविषये अणि प्राप्ते वर्त्तमानसूत्रेण तस्य लुक् स्यात्। वृत्तौ "द्विगोर्निमित्तम्" इति कथमुक्तम् ? तद्धितार्थविषयादन्यत्र "तस्येदम्" इत्यादि अर्थे प्रत्ययस्य लुक् यथा न स्यात् ; ततः पञ्चकपालस्य इदम् इति पञ्चकपाल+अण्=पाञ्चकपालम्। 'अजादिः' कथं वृत्तौ अन्तर्भुक्तम् ? पञ्चभ्यः गर्गेभ्यः आगतम् इत्यर्थे "हेतुमनुष्येभ्योऽन्यतरस्याम्" इति सूत्रविहितरूप्यप्रत्ययः तद्धितार्थयुक्तः अपि अजादित्वाभावात् न लुप्तः। वृत्तौ 'अनपत्ये' कथमुक्तम् ? अपत्यार्थे द्विगौ प्रत्ययः (इञ्) अजादिरपि यथा लुप्तो न स्यात्, 'द्वयोर्मित्रयोरपत्यं' द्वैमित्रिः इत्यादि च यथा सिध्येत्॥

१०८१। गोत्रेऽलुगचि ।४।१।८९॥

दी—। अजादौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्ययस्य अलुक् स्यात्। गर्गाणां छात्राः। "वृद्धाच्छः"॥

An affix denoting गोत्रार्थ and which is to elide by such rules as "यस्कादिभ्यो गोत्रे," does not elide when again an अजादि Tadd-

hita is to follow and has प्राग्दीव्यतीय sense. Thus गर्गस्य गोत्रापत्यम् =गार्ग्यः with यञ् by—गर्गादिभ्यो यञ्। This यञ् elides in the plural by "यञञोश्च" and the form in the plural is गर्गाः। Then in the sense गर्गाणां (i. e. बहुगर्गाणां) छात्राः, "छ-प्रत्यय" is due by the rule "वृद्धात् छः" (गार्ग्य being a word beginning with a वृद्धि vowel "आ"।—This छ is=ईय)। So अजादि प्राग्दीव्यतीय तद्धित affix following on, the गोत्रार्थप्रत्यय i. e. यञ् after गर्ग (which elided in the plural) will not elide by this present rule when ईय follows. Thus the form now is गार्ग्य+ईय or गार्ग्य्+ईय and we look forward—

मित—। गोत्रे+अलुक्+अचि इति छेदः। "प्राग्दीव्यतः" इति वर्त्तते, ततः प्राग्दीव्यतीये प्रत्यये इति अर्थो भवति। "अचि" इति तस्य विशेषणम्; ततः आह "अजादौ प्राग्दीव्यतीये विवक्षिते अलुक् स्यात्"। कस्य अलुक् भवेत्? इत्याह— "गोत्रे" वर्त्तमानस्य प्रत्ययस्य, गोत्रार्थकप्रत्ययस्य इति यावत्, अलुक् स्यात्। "यञञोश्च", "यस्कादिभ्यो गोत्रे"—इत्यादि सूत्रेण येषां गोत्रप्रत्ययानां लुक् विहितः, तेषाम् एव अजादौ प्राग्दीव्यतीये विषयभूते अलुक् कथ्यते इति सूत्रनिष्कर्षः। एवम् गर्गस्य गोत्रापत्यं गार्ग्यः ("गर्गादिभ्यो यञ्") इति यञ्, अस्य बहुत्वविवक्षायाम् "यञञोश्च" इति सूत्रेण यञो लुक् उक्तः, ततः "गर्गाः" इति भवति। अधुना— गर्गाणां (बहुगार्ग्याणाम्? इत्यर्थः) छात्राः इत्यर्थे, "वृद्धाच्छः*" इति सूत्रेण प्राग्-दीव्यतीये (छ-प्रत्ययस्य आदेशभूते) ईय-रूपे अजादौ विवक्षिते, वर्त्तमानसूत्रेण गोत्रप्रत्ययस्य "यञ्"—इत्यस्य अलुकि सति, गार्ग्य+ईय इति स्थिते, 'यस्येतिच' सूत्रेण अकारलोपे गार्ग्य्+ईय इति जाते आह—

१०८२। आपत्यस्य च तद्धितेऽनाति।६।४।१५१॥

टी—। हलः परस्य अपत्य-यकारस्य लोपः स्यात् तद्धिते परे न

[* यस्य समुदायस्य अचां मध्ये आदिः वृद्धिः तत्वृद्धसंज्ञं स्यात्]।

तु आकारे। गार्गीयाः। प्राग्दीव्यतीये किम्? गर्गेभ्यो हितम् गर्गीयम्। अचिकिम्? गर्गेभ्यो आगतं गर्गरूप्यम्।

The अपत्य-यकार affix which comes after a हल् letter (i.e. a consonant) elides when a further Taddhita affix follows, but not if an affix benginінig with आकार follows. Thus गार्ग्य+ईय= गार्ग्+ईय (by यस्येतिच) = गार्गीय (with यलोप by the present rule) ; why do we say प्राग्दीव्यतीये in the vritti ?—Witness गर्गेभ्यो हितम् गर्गीयम्। Here the rule "तस्मै हितम्" directs (ईय) after गर्ग (=बहुगार्ग्य) but it is outside प्राग्दीव्यतीय senses, so here the गोत्रप्रत्यय यञ् elides, and is not retained as in प्राग्दीव्यतीय senses. Why do we say अचि in the sutra "गोत्रे लुगचि" ? Witness गर्गरूप्यम्, here रूप्य-प्रत्यय being not अजादि, the गोत्रप्रत्यय यञ् elides by "यञञोश्च" and is not retained (as in the case of गार्गीयाः)।

मित—। "ढ्रलोपोऽकाद्राः" इति सूत्रात् 'लोपः' इति, "सूर्य्यतिष्य—"इति सूत्रात् 'य' इति च षष्ठ्यन्तं सत् अनुवर्त्तते। "हलस्तद्धितस्य" इति सूत्रात् 'हलः' इति पञ्चम्यन्तमनुवर्त्तते। 'अपत्यस्य' अपत्यप्रत्ययविषयकस्य इदम् इति 'आपत्यम्' (अण्), तस्य। इदं 'य-कारस्य' इत्यस्य विशेषणम्। ततः आह—हलः परस्य आपत्य-यकारस्य लोपः स्यात् तद्धिते परे, न तु आति परे—आकारयुक्ततद्धितप्रत्यये परे इत्यर्थः। एवं सति गार्ग्य+ईय=गार्गीयाः इति अनेनसूत्रेण य-लोपे सति सिध्यति। पूर्वसूत्रे 'प्राग्दीव्यतीये' इति कथमुक्तम? "तस्मै हितम्" इति सूत्रविहितप्रत्ययस्य प्राग्दीव्यतीय-वहिर्भूतत्वात् हितार्थे गार्ग्य+छ (ईय) इति कृते गोत्रार्थकयञ् प्रत्ययस्य "यञञोश्च" इति लुग्च, न तु अलुक्। पूर्वसूत्रे 'अचि' इति कस्मात् उक्तम्? अनजादौ प्राग्दीव्यतीये सति अपि "यञञोश्च" इति गोत्रार्थप्रत्ययस्य लुगेव यथा स्यात्। ततः गर्गेभ्यः आगतम् इति यञ्लोपे गर्गरूप्यम् एव भवति।

१०८३। यूनि लुक् ।४।१।१०॥

दी— । प्राग्दीव्यतीये अजादिप्रत्यये विवक्षिते युवप्रत्ययस्य लुक् स्यात् । ग्लुचुकस्य गोत्रापत्यं ग्लुचुकायनिः । वक्ष्यमाणः फिन् । ततो यूनि अण् = ग्लौचुकायनः । तस्य छात्रोऽपि ग्लौचुकायनः । अणो लुकि वृद्धत्वाभावात् छो नः ।

An affix (तद्धितप्रत्यय) denoting युवार्थ elides when a further अजादि affix (तद्धित) having प्राग्दीव्यतीय sense is to follow or is mentally wished to be added on. Thus ग्लुचुकस्य गोत्रापत्यम् gives ग्लुचुकायनिः (will फिन् i. e. आयनि by the rule "प्राचामवृद्धात् फिन् बहुलम्") ; Then तस्यापत्यं युवा gets अण् by "प्राग्दीव्यतोऽण्", and the form is ग्लौचुकायनः । Now in the sense तस्य छात्राः, the युवप्रत्यय i.e. अण् here elides by the present rule giving ग्लुचुकायनि as before; then adding अण् (छात्रार्थे) we get finally ग्लौचुकायनः । Now the question may arise that if the final is the same with or without elision of युवार्थकप्रत्यय,* then why this mention for elision of युवार्थकप्रत्यय ? On this the answer is given by Bhattoji —if elision of युवार्थकप्रत्यय is not mentioned then ग्लौचुकायनः (with—यूनिअण्) will take छ in the sense तस्य छात्राः by "वृद्धात् छः", for ग्लौचुकायन begins with a वृद्धि vowel (i.e. औ), whereas by saying "elision of युवप्रत्यय when a further affix is to be added", we get ग्लुचुकायनि (with—elision of युवार्थकप्रत्यय i. e. अण्) and then this अण् being elided ग्लुचुकायनि is not

---

* See rules 'अपत्यं पौत्रप्रभृति गोत्रम्' and "जीवति तु वंश्ये युवा" for meanings of गोत्रसंज्ञा and युवसंज्ञा is तद्धित ; comp. वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद् युवसंज्ञं न तु गोत्रसंज्ञम् ॥

a वृद्ध word (for its first vowel is now no longer a वृद्धि vowel) and so we do not get छ here by the rule "वृद्धाच्छः" ; thus Bhattoji has "अणोलुकि वृद्धत्वाभावात्छोन"। Hence the necessity of saying—elision of युवार्थ प्रत्यय here by this rule.

मित। अत्र 'प्राग्दीव्यत' इत्याद्यनुवृत्तिरस्ति पूर्वसूत्रवत्। ततः आह— "अजादौ प्राग्दीव्यतीये प्रत्यये विवक्षिते (वृद्धिस्थे अनुत्पन्न एव) युवप्रत्ययस्य लुक् स्यात्"। उदाहरणं यथा—ग्लुचुकस्य गोत्रापत्यमिति ग्लुचुकायनिः, "प्राचामवृद्धात् फिन् बहुलम्—" इति सूत्रेण फिन्। तत आह—"वक्ष्यमाणः फिन्"। ततः तस्य अपत्यं युवा इत्यर्थे "प्राग्दीव्यतोऽण्" इति सूत्रेण—अण् स्यात् ततः ग्लौचुकायनः इति, अतः भट्टोजिराह—"ततो यून्यण्" इत्यादि। तस्य छात्रः इत्यर्थे विवक्षिते एव युवार्थकप्रत्ययस्य अणोलुक् स्यात्, ततः ग्लुचुकायनिः इति जायते, अधुना छात्रार्थकस्य अण्-प्रत्ययस्य पुनः प्राप्तौ ग्लौचुकायन इति भवति। ननु युवप्रत्यये अलुप्तेपि ग्लौचुकायन एवस्यात् तत् कथं "यूनिलुक्" इत्यनेन युवार्थकप्रत्ययस्य लुक् विहितः ? अतोत्तरमाह—युवप्रत्ययस्य अलुकि सति, 'ग्लौचुकायन'—शब्दस्य प्रथमाचः वृद्धत्वात् 'तस्य छात्रः' इत्यर्थे 'वृद्धाच्छः' इति छः भविष्यति, ततो ग्लौचुकायनीय इति अनिष्टमापद्येत ; किन्तु लुकि उक्ते युवप्रत्ययस्य अणो लुप्तत्वात् 'ग्लुचुकायनि' शब्दस्य वृद्धत्वाभावात् छः न स्यात्, किन्तु अण् भवेत्, ततः इष्टम् ग्लौचुकायनपदं लभ्यते। अतः दीक्षित आह— "अणो लुकि वृद्धत्वाभावात् छो न"। युवप्रत्ययस्य लुग्विषये सूत्रान्तरमाह—

१०८४। पैलादिभ्यश्च ।२।४।५९॥

दी—। एभ्यो युवप्रत्ययस्य लुक्। "पीलाया वा" (सूत्र ११२१) इत्यण्। तस्मात् "अणो द्व्यचः" (सूत्र ११८०) इति फिञ्। तस्यलुक्। पैलः पितापुत्रश्च। "तद्राजाच्चाणः" —(गणसूत्रम्)। "द्व्यञ्मगध—" इत्यस्यन्तात् आङ्गशब्दात् "अणोद्व्यचः" इति फिञोलुक्। आङ्गःपिता पुत्रश्च।

The युवार्थक affix elides, after words of the पैल class. Thus पीलाया गोत्रापत्यम् gives पैलः (with अण by the rule "पीलाया वा"—1121—in supercession of the general rule "स्त्रीभ्यो ढक्")। Then पैलस्य अपत्यं युवा is to yield पैल+फिञ् by the rule "अणो द्व्यचः" (Sutra 1180); but this फिञ् (युवप्रत्यय) elides by the present rule giving the form पैल as before. So both पिता (father) and पुत्र (son) are called पैल। The पैलादि list (as given under Tika here) says that the युवप्रत्यय after अण् the तद्राज affix—(i.e. a तद्धित affix i.e. अञ् अण &c. having sense of both तस्यापत्यं and तेषां राजा is called तद्राज affix by the rule "ते तद्राजाः") —elides. Thus अङ्गानां अपत्यं वा राजा gives अङ्ग+अण (by the rule "द्व्यञ्मगधकलिङ्गसूरमसादण्")=आङ्गः, अस्य युवापत्यम् is to take फिञ by "अणोद्व्यचः"। Now the ganasutra "तद्राजाच्चाणः" under this पैलादि list declares elision of युवप्रत्यय i. e. फिञ after this आङ्ग। So the final form with युवप्रत्यय sense is आङ्ग as well. So Bhattoji as before says "आङ्गः पिता पुत्रश्च" i.e. आङ्ग means and is applied to both father and son.

[N. B.—Note that this पैलादि in not a closed list].

मित—। "ण्यक्षत्रियार्षञितो यूनि लुगणिञोः" इत्यतः "यूनि लुक्" इत्यनुवर्त्तते। अतः 'पैलादिभ्यः परस्य युवप्रत्ययस्य एव लुक्' इत्यर्थो जायते। उदाहरणं यथा—"पीलाया गोत्रापत्यं इत्यर्थे 'स्त्रीभ्यो ढक्' इति ढकं वाधित्वा 'पीलाया वा' इत्यण् भवति"—(बालमनोरमा)। ततः—'पैल' इति जायते। अस्मात युवप्रत्यये सति "अणोद्व्यचः" इति फिञ् (आयनि) प्राप्नोति। वर्त्तमान-सूत्रेण अस्य प्रत्ययस्य लुकि सति—(युवप्रत्ययार्थे) 'पैल' एव भवति। अतः भट्टोजिः प्राह—"पैलः पिता पैलःपुत्रश्च"। पैलादिगणे एव सूत्रमस्ति—"तद्राजाच्चाणः"—तद्राजप्रत्ययात् अणः परस्य युवार्थकप्रत्ययस्य लुक स्यात् इति। केच तद्राज-

प्रत्ययाः ? "जनपदशब्दात् क्षत्रियात् अञ्" सप्रादपत्ये········तस्य राजन्यप्येवम्"
—इति अपत्ये राजनि च अर्थे, क्षत्रियवाचकात् तथा जनपदवाचकात् शब्दात् ये अञ्
—अण्—प्रभृतयः उक्तादिसूत्रेण विहिताः तएव तद्राजाः ; "ते तद्राजाः" इति हि
सूत्रम्। एवं सति अङ्गानां अपत्यं राजा च इत्यर्थे अण् प्राप्नोति—"द्व्यञ्मगधकलिङ्ग-
सूरमसात् अण्"इति सूत्रेण। ततः 'आङ्ग' इतिरूपं लभ्यते। अस्य युवार्थे "अणोद्व्यचः"
इति फिञि प्रकृते सति वर्त्तमानसूत्रेण तस्य लुक्। ततः युवार्थकप्रत्ययेपि आङ्ग एव
जायते। अतः भट्टोजिराह—"आङ्गः पिता पुत्रश्च"।

पैलादि यथा—पैल, शालङ्कि, सात्यकि, सात्यकामि, राहवि, रावणि, औदञ्चि,
औदव्रजि, औदमेघि, औदमसिञ्ज, औदभृज्जि, दैवस्थानि, पैङ्गलौदायनि, राहक्षति,
भौलिङ्गि, राणि, औदमन्यि, औदगाहमानि, औज्जिहानि, औदशुद्धि, तद्राजाश्चाण्।
आकृतिगणोयम्॥

अत्रगणे पैलशब्दं वर्जयित्वा सर्वे शब्दा इञन्ताः। तेभ्यः "इञः प्राचाम्" इति
उत्तरसूत्रेण लुकिसिद्धे अत्र पाठो व्यर्थः इति चेत्? नैवम्। यतः उत्तरसूत्रे
"प्राचां गोत्रार्थे एव लुक् स्यात्" इति विहितम्। अत्र तु "अप्राचां गोत्रार्थेपि यथा
स्यात् तदर्थं एते इञन्ताः पठिताः—इति समाधेयम्"।

१०८५। इञः प्राचाम् ।२।४।६०॥

टी—। गोत्रे य इञ् तदन्तात् युवप्रत्ययस्य लुक्स्यात्, तच्चेद् गोत्रं प्राचां भवति। पन्नागारस्य अपत्यम्—"अत इञ्", "यञिञोश्च" इति फक् (तस्य लुक्?)—पान्नागारिः पिता पुत्रश्च। प्राचाम् किम्? दाक्षिः पिता, दाक्षायणः पुत्रः।

The word having the affix इञ् in the sense of गोत्र after it, has its युवप्रत्यय elided after it, if again that गोत्र refers to one of प्राग्देश। Thus पन्नागार refering to one of प्राग्देश, takes इञ् in the sense of गोत्रापत्य by the rule "अतः इञ्" yielding the form पान्नागारि। Then the युवप्रत्यय to be added to it is फक् by the

rule "यञिञोश्च" ; but this फक् elides by the persent rule finally giving पान्नागारि as well. So Bhattoji has "पान्नागारिः पिता पुत्रश्च"। Why do we say "प्राचाम्" in the rule ? Witness दाक्षिः पिता with इञ्, and दाक्षायणः पुत्रः with फक् by the rule "यञिञोश्च", for दाक्षि does not refer to प्राग्देशीय गोत्र, and thus लुक् of the युवप्रत्यय by the present rule does not come in.

मित—। 'इञ' इति पञ्चम्यन्तम्। अस्य प्रत्ययत्वे तदन्तग्रहणम्। अर्थतः गोत्रार्थकत्वं लभ्यते। तत आह "गोत्रे च इञ् तदन्तात्"। "ण्यक्षत्रिय—" इति सूत्रात् 'यूनि लुक्' अनुवर्त्तते। तेन शेषपूरणेन आह—" तदन्तात् युवप्रत्ययस्य लुक् स्यात्"। 'प्राचाम्'—इति गोत्रं विशिनष्टि, व्याख्यानमेवात्र शरणम्। तदाह "तच्चेत् गोत्रं प्राचां भवति"। पन्नागारस्य गोत्रापत्यम् इति पान्नागारिः, "अतइञ्" इति गोत्रापत्ये इञ भवति। अस्य प्राग्देशीय गोत्रत्वात्, अस्मात युवप्रत्यये सति "यञिञोश्च" इति सूत्रेण फक् प्राप्नोति। वर्त्तमानसूत्रेण च तस्य लुक् स्यात्। ततः पान्नागारिः इत्येव लभ्यते। अतः आह—"पान्नागारिः पिता पुत्रश्च"। सूत्रे "प्राचाम्' इति किमर्थमुक्तम् ? दाक्षिः पिता (दक्ष+इञ गोत्रापत्य), किन्तु दाक्षायनः पुत्रः (दाक्षि+"यञिञोश्च" इति फक्); अत्र फक् इति युवप्रत्ययस्य लुग् न भवति, यतः दाक्षिशब्दः प्राग्देशीयगोत्रत्वं न बोधयति।

१०८६। न तौल्वलिभ्यः।२।४।६१॥

टी—। तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुक् न स्यात्। पूर्वेण प्राप्तः (निषिध्यते ?)। तुल्वलः—तत इञि फक्। तौल्वलिः पिता—तौल्वलायनः पुत्रः।

Words of the तौल्वलि class (having the गोत्र affix इञ् after these) do not elide the युवप्रत्यय to be added after it. This sutra prohibits elision of the युवप्रत्यय that is to take place by the previous rule. Thus तुल्वल+इञ् (गोत्रापत्य)=तौल्वलिः। Then by

"यञिञोश्च" we get तौल्वलायन: with फक् added in the sense of युवप्रत्यय by the present rule, though it refers to a प्राच्य गोत्र ।

मित—। 'तौल्वलिभ्य:' इति बहुवचनेन तौल्वल्यादिगणो लक्ष्यते। तत आह 'तौल्वल्यादिभ्य: परस्य' इत्यादि। तुल्वलो नाम कश्चित् प्राच्य:। तस्य गोत्रापत्यं पुमान् इति तौल्वलि:, "अत इञ्" इतिसूत्रेण। एतदन्तस्य वर्त्तमानसूत्रेण युवप्रत्ययस्य अलुकि सति, तौल्वलि + फक् = तौल्वलायन:, "यञिञोश्च" इति सूत्रेण फक्। अत आह—"तौल्वलि: पिता। तौल्वलायन: पुत्र:"।

तौल्वल्यादिर्यथा:—तौल्वलि, धारणि, पारणि, रावणि, दैलीपि, दैवमिति, दैवति, वार्कलि, नैककि, दैवयज्ञि, दैवमति, वाफढ्ढकि, वैल्वकि, वैश्वकि, आनुरोहिति, पौष्करसादि, आनुराहति, आनुति, प्रादोहनि, नैमिश्रि, प्राडाहति, वान्धकि, वैशीति, आसिनासि, आहिंसि, आमुरि, नैमिषि, आसिबन्धकि, पौष्पि, कारेणुपालि, वैकर्णि, वैनकि, वैहृति ॥

१०८७। फक्फिञोरन्यतरस्याम् ।४।१९१॥

टी। "यूनि लुक" (सूत्र—१०८८) इत्येव पूर्वेण नित्ये प्राप्ते विकल्पार्थं सूत्रम्। कात्यायनस्य छात्रा: = कातीया:—कात्यायनीया:। यस्कस्यापत्यं—यास्क:। 'शिवाद्यण्'। तस्यापत्यं युवा = यास्कायनि:। "अणो द्व्यच:" इति फिञ्। तस्य छात्रा: यास्कीया:—यास्कायनीया: ।

The compulsory elision of the युवप्रत्यय that is enjoined by the sutra "यूनि लुक" (No. 1083), is optionally done in the case of the affixes फक् and फिञ् denoting युवप्रत्यय। Thus कतस्य गोत्रापत्यम् gives कात्य with गर्गादि यञ्, then कात्यस्य अपत्यं युवा yields कात्य + फक् = कात्यायन: (by the rule "यञिञोश्च"); now कात्यायन: ends in फक् which is a युवप्रत्यय, so this फक् will optionally elide by this rule, if further तद्धितप्रत्यय is done

after it, as कात्यायनस्य छात्राः इति कातीयाः (with elision of फक्), and कात्यायनीयाः (without elision of फक्)। Similarly यस्कस्यापत्यम् =यास्कः with अण्, तस्य युवापत्यम् = यास्कायनिः with फिञ् by "अणोद्व्यचः"। Then this फिञन्त word (having युवप्रत्यय) optionally elides this फिञ् if further तद्धितप्रत्यय is added after it. Thus तस्य छात्राः = =यास्कीयाः with elision of फिञ्, and यास्कायनीयाः without elision of फिञ्।

मित—। "यूनि लुक्" इति पूर्वसूत्रमत्र वर्त्तते ; ततः आह—"यूनि—" इति पूर्वेण नित्ये लुकि प्राप्ते, युवार्थकप्रत्यययोः फक्फिञोः लुक् वा स्यात् ; अतः सूत्रे "अन्यतरस्याम्"—इत्याह। उदाहरणं यथा—कतस्य गोत्रापत्यम् इति कात्यः ("गर्गादिभ्यो यञ्" इति यञ्)। तस्य युवापत्यम् इति कात्य+फक्= कात्यायनः ("यञिञोश्च" इति फक्)। कात्यायनस्य छात्राः इत्यर्थे तु वर्त्तमानसूत्रेण कात्यायनशब्दे यः युवप्रत्ययो वर्त्तते (यथा फक्), तस्य विकल्पेन लुक्स्यात्। लुकि तु—कात्यायन+छ (ईय)=कात्य+ईय=कात्य्+ईय ("यस्येति च" इत्यकारलोपः)=कात्+ईय ("आपत्यस्य च—" इति यलोपः)=कातीयाः। लुगभावे तु कात्यायनीयाः। एवम्—युवार्थक—फक्-प्रत्ययस्य वैकल्पिकं लोपमुदाहृत्य तादृशस्य फिञो लुकमुदाहरति—यस्कस्यापत्यम्=यास्कः (शिवादित्वात् अण्) ; ततः तस्य युवापत्यम् इत्यर्थे "अणोद्व्यचः" इति फिञ्। अस्मात् तस्य छात्राः इत्यर्थे वर्त्तमानसूत्रेण फिञोलुकि सति यास्कीयाः ("वृद्धाच्छः" इतिछः), असति लुकि वृद्धत्वात् छे सति यास्कायनीया इति।

१०८८। तस्यापत्यम्। ४।१।९२॥

दी—। षष्ठ्यन्तात् कृतसन्धेः समर्थात् अपत्ये अर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः। उपगोरपत्यम् औपगवः। आदिवृद्धिः अन्त्योपधावृद्धी बाधते।

The previous and following तद्धितप्रत्ययs are added to the entire षष्ठ्यन्त words syntactically connected with another, in the sense of अपत्य (descendant). See also rule 1072 ; thus उपगोः अपत्यम् gives औपगव (with अण्—आदिवृद्धि and then अन्त्यगुण by the rule "ओर्गुणः")। Now in तद्धित this आदिवृद्धि by the rule "तद्धितेष्वचमादेः" will bar the वृद्धि in the final and in the penultimate vowels, though the प्रत्यय may end in ण् or ञ् and then though अन्त्यवृद्धि may be due by "अचोञ्णिति" etc. Thus in उपगु + अण् we get आदिवृद्धि and then अन्त्यगुण by "ओर्गुणः" and no अन्त्यवृद्धि as well.

मित—। 'तद्धिता' इति, 'प्रत्ययः' 'परः' चाधिकृतम् अस्ति। तच्छब्दस्य सर्वनामतया परामर्शित्वात् उपग्वादिशब्दान् बोधयति। ततः 'तस्य' उपग्वादेः 'अपत्यम्' इत्यर्थे उक्ता वक्ष्यमाणाः तद्धितप्रत्ययाः भवन्ति। कस्माद्भवन्ति ? इत्यपेक्षायामाह—षष्ठ्यन्तात् शब्दात्,—यश्च शब्दः पुनः सामर्थ्यहेतोः प्रथमं सन्धिकार्य्यं गत्वा, अर्थवच्छब्देन परिणतः आकाङ्क्षाद्यर्थेन च युक्तः—तस्मात् तद्धितप्रत्ययाः भवन्ति। सर्वमेतत् "समर्थानां प्रथमाद्वा" इत्यस्य व्याख्यायाम् स्फुटीकृतम्—तत्रैव द्रष्टव्यम्। एवम् उपगोरपत्यम् इत्यत्र षष्ठ्यन्तात् 'उपगुशब्दात्' प्रत्ययो भवति। ततः अपत्यार्थे अणि कृते "तद्धितेष्वचामादेः" इति आदिवृद्धौ, "ओर्गुणः" इति अन्त्यगुणेचसति 'औपगवः' इति स्यात्। ननु सत्यपि आदिवृद्धौ "ओर्गुणः" इति गुणं बाधित्वा "अचो ञ्णिति" इति सूत्रेण वृद्धिरेवास्तु स्थानभेदेन उभयसम्भावात् इति चेत् ? नैवम्, तद्धितविषये आदिवृद्धिः "अन्त्यवृद्धिम् तथा उपधावृद्धिं बाधते"। कथमेतत् ज्ञातमितिचेत्, तदाह—"अनुशतिकादीनाञ्च" इति सूत्रे उभयोः पदयोः आदिवृद्धिविधानात् ज्ञायते, यत् आदिवृद्धौ सत्याम् उपधावृद्धिः न स्यात्। तदा उभयपदवृद्धिविधानम् व्यर्थम् स्यात्। ततः तक्रकौण्डिन्यन्यायात् "सत्यपि उभय-सम्भवे बाधनं भवति" इति भाष्येपि स्थितम्। व्याकरणे—अपत्यशब्दार्थस्तु उत्तरसूत्रादौ स्फुटीभविष्यति।

दी—। "तस्येदमित्यपत्येऽपि बाधनार्थं कृतंभवेत्। उत्सर्गः शेषएवासौ वृद्धान्यस्य प्रयोजनम्" ॥—(श्लोकवार्त्तिकम्) ॥ योगविभागस्तु। भानोरपत्यं भानवः। कृतमन्धेः किम्? सौत्थितिः। अकृतव्यूहपरिभाषया साबुत्थितिर्माभूत्॥ समर्थ-परिभाषया नेह—वस्त्रमुपगोरपत्यं चैत्रस्य। प्रथमात्किम्? अपत्यवाचकात् षष्ठ्यर्थे माभूत्। 'वा'—ग्रहणात् वाक्यमपि। "दैवयज्ञि—" इतिसूत्रात् 'अन्यतरस्याम्'—ग्रहणानुवृत्तेः समासोऽपि—उपग्वपत्यम्। जातित्वात् ङीष्—औपगवी॥ आश्वपतः। दैत्यः। औत्सः। स्त्रैणः। पौंस्नः।

Now it may be said that the rule "तस्यापत्यम्" is useless, for its sense may be got in the rule "तस्येदम्" (where by इदम् we can draw down अपत्यम् etc.); nor can it be said that the rule"तस्यापत्यम्"is useful with respect to the later sutra"अतइञ्", for then the Sutrakara might unite these two rules into one as "तस्यापत्येऽत इञ्"! On this the reply is—that if "तस्यापत्यम्"—sense is included in the rule "तस्येदम्" then with respect to वृद्ध words (i.e. words beginning with a वृद्धि—vowel) the affix will be 'छ' (ईय) by the rule "वृद्धाच्छः" in अपत्याधिकार as well. If again it is said that the rule "वृद्धाच्छः" being in शेषाधिकार (i. e. being in senses other than अपत्य and चतुरर्थ—चतुरर्थ including "तदस्मिन्नस्ति इति देशे तन्नाम्नि", "तेन निर्वृत्तम्", "तस्य निवासः", "अदूरभवश्च") has no application in अपत्याधिकार so let "तस्येदम्" include "तस्यापत्यम्" also and make the sutra useless. Then however the reply is—that अण् coming by the rule

"तस्यापत्यम्" applying in cases other then "अत इञ्", बाह्वादि इञ्, शिवाद्यण्, गर्गादि यञ् &c. falls within शेषाधिकार as well, for शेष is "उक्तात् वा विनियुक्तात् अन्यः शेषः", and then छ will come in cases of वृद्ध words ; So to direct अण् also in cases of वृद्ध words as well the seperate rule "तस्यापत्यम्" is made here apart from "तस्येदम्"। Thus Panini makes two योगs here ; and भानु being a वृद्ध word (it having a first वृद्धि vowel—आ) takes अण् in the sense of अपत्य and not छ, yielding भानु + अण् = भानव (by गुण of the final vowel by "ओर्गुणः") । "प्रदीयताम् दाशरथाय मैथिली" &c are आर्षप्रयोग । इञ् yielding दाशरथि should be legitimate here by "अत इञ्" । Why do we say कृतसन्धेः in the vritti of this rule as well as in the rule "समर्थानां प्रथमाद्वा" ? Witness—सुउत्थितं यस्य = सुउत्थित = सूत्थित ; now सूत्थितस्य अपत्यम् इति सूत्थित + इञ् = सौत्थितिः by "अत इञ्" । Had we not said कृतसन्धेः in the वृत्ति, then in सु + उत्थित + इञ्, we had first to make वृद्धि of the vowel in सु (it being पर) and then by सन्धि the form would have been सावुत्थितिः ; nor being अन्तरङ्ग (an internal affair) we are to make सन्धि first and then वृद्धि; for अकृतव्यूहपरिभाषा being still more forceful than अन्तरङ्गविधि might have operated here making वृद्धि first and सन्धि later (for अकृतव्यूहपरिभाषा see our Vol. I.) yielding the undesirable form सावुत्थिति । So to avoid this form and to establish the desired result सौत्थितिः we distinctly say "कृतसन्धेः" in our vritti of this rule. The तद्धित प्रत्यय is also to take place when there is सामर्थ्य (interdepenence &c.), so in case of वस्त्रमुपगोः अपत्यं चैत्रस्य we cannot get अपत्यप्रत्यय after उपगु, for this word is not related to अपत्यम् but to वस्त्रम् here. Why again do we

say प्रथमात् in the first rule in तद्धिताधिकार ? Because we are to get the affiix after the first षष्ठ्यन्त word and not after a अपत्यवाचक प्रथमान्त word (as उपगुरपत्यम् अस्य देवदत्तस्य—here no अपत्य प्रत्यय will arise after "उपगु")। There being "वा" in the first rule here 'optinally we get the वाक्य as well, as उपगोः अपत्यम् (as already said) ; that here समास (as उपग्वपत्यम्) is also optionally allowed owing to "अन्यतरस्याम्" coming down in the rule "समर्थानां प्रथमाद्वा" from the rule "ङ्यापो्—" (1201) see ante. Now again औपगव being a जातिवाचक word ङीष् will come in the feminine yielding औपगवी (see स्त्रीप्रत्यय under "जातेरस्त्री—") ; similarly अश्वपति + अण् अपत्यार्थे = आश्वपतः by "अश्वपत्यादिभ्यश्च," ; दिति + ण्य (अपत्यार्थे) = दैत्यः, उत्स + अञ् अपत्यार्थे = औत्सः, स्त्री + नञ् अपत्यार्थे = स्त्रैणः, पुम्स् + स्नञ् (अपत्ये) = पौंस्नः (see ante) etc.

मित—। श्लोकवार्त्तिकमिदम् ॥ ननु "तस्येदम्" इति सूत्रेणैव, "तस्यापत्यम्" इति सूत्रार्थस्य गतार्थत्वात्, कथमत्र सूत्रकारेण व्यर्थं "तस्यापत्यम्" इति पृथक् सूत्रं कृतमिति चेत् ('तस्येदम्' इत्यत्र 'इदम्'—पदेन, अस्य 'अपत्येऽपि' अर्थलाभात्) —? मैवम् वद—तदा अपत्यार्थेऽपि "वृद्धाच्छः" इति वृद्धशब्दात् छ-प्रत्ययः स्यात्, यतः "'तस्येदम्' इत्यत्र अव्यवहितपरसूत्रं "वृद्धाच्छः" अस्ति, 'तद्बाधनार्थम्' वृद्धादपि अपत्ये छ-प्रत्ययः यथा न स्यात् एतदर्थम् "तस्यापत्यम्" इति पृथक् सूत्रं 'कृतं' विहितम् भवेत्, अत आह —"बाधनार्थं कृतं भवेत्"। यदि पुनरिदमुच्यते—यत् "वृद्धाच्छः" इति सूत्रस्य शेषाधिकारस्थत्वात् (अपत्यादिचतुरर्थान्तेभ्यः अन्यः शेषः इति व्याख्यानात्), अपत्यविषये अस्य प्रयोगो नास्ति एव। ततश्च पुनः वृद्धशब्दात् छप्रत्ययबाधनार्थं पृथक् "तस्येदम्" इति सूत्रकरणप्रयोजनं नास्तिएव, तदा समाधानमेवं भवेत्, यथा— "तस्यापत्यम्" इति सूत्रविहितं यदण्, तदपि अदन्तवाह्वादिभिन्नप्रकृतिकत्वात् शेषः 'उक्तात् वा विनियुक्तात् अन्यः शेषः' इति हि न्यायः, अत आह—"उत्सर्गः शेष एवासौ"। एवमपि अत्र शेषाधिकारस्थस्य छ-प्रत्ययस्य प्रसङ्गो भवेत् स च प्रसङ्गः वृद्धशब्द-

विषये एव; अत आह—"वृद्धान्यस्य प्रयोजनम्"। वृद्धशब्दात् (यस्य आदिः आ-ऐ-औ इति वृद्धिस्वरयुक्तः—स एव वृद्धशब्दः, तस्मात्) अपि अपत्यविषये छ-प्रत्ययो यथा न स्यात् अतः पृथक् सूत्रम् "तस्यापत्यम्" इति सूत्रकारेण विहितम्। अस्मात् हेतोः "तस्यापत्यम्" इति पृथक् योगः विहितः। अतः भट्टोजिराह—"योगविभागस्तु"। एवं वृद्धात् भानुशब्दात् (भानुशब्दे प्रथमवृद्धिस्वर 'आ' इति सत्वात् असौ वृद्धशब्दः) अपत्ये अणेव भवति न तु छ-प्रत्ययः—ततः भानु+अण्=भानो+अण्=भानवः। वृत्तौ "कृतसन्धेः" इति किमर्थम् उक्तम्? तदाह—सु उत्थितमस्य इति सूत्थितः, तस्यापत्यम् इति सूत्थित+इञ्=सौत्थितिः। अत्र सु+उत्थित इत्यत्र सन्धिं कृत्वा 'सूत्थित'—इति शब्दं साधयित्वा, पश्चात् तद्धितप्रत्ययः यथा स्यात्, अतः आह—'कृतसन्धेः' इति। यदि सु+उत्थित+इञ्—इत्यत्र परत्वात् प्रागेव आदिवृद्धिः स्यात्, पश्चाच्च सन्धिकार्य्यं भवेत्, तदा 'सावुत्थितिः' इति अनिष्टं पदं लभ्यते; न च 'अन्तरङ्गत्वात् सन्धिकार्य्यस्य बलवत्त्वं' वाच्यम्, तदा ततोपि बलीयस्या अकृतव्यूह-परिभाषया सन्धेः प्रागेव प्रत्ययो भवितुमर्हति, अनिष्टं 'सावुत्थितिः' लभ्यते, अतः "अकृतव्यूहपरिभाषया सावुत्थितिर्माभूत्", इत्यर्थमपि वृत्तौ "कृतसन्धेः" इति विशिष्य उक्तम्। अतश्च "समर्थानां प्रथमाद्वा" इति सूत्रे दीक्षितचरणैः "सामर्थ्यं··· कृतसन्धिकार्य्यत्वमिति यावत्" इति कथितम्॥ सामर्थ्ये सति प्रत्ययो भवति—इति हि समर्थपरिभाषाया आदेशः, ततः "वस्त्रमुपगोः अपत्यं चैत्रस्य" इत्यत्र 'उपगोः' शब्दस्य 'अपत्य' शब्दस्य च परस्परसामर्थ्याभावात् तद्धितप्रत्ययो न स्यात्। उक्तसूत्रे 'प्रथमात्' कथमुक्तम्—तदाह—"षष्ठ्यन्त्यादेव न तु प्रथमान्तात् प्रत्ययो भवति"। अतः 'अपत्यवाचकात्' प्रथमान्तात् 'षष्ठ्यर्थे' परे सत्यपि प्रत्ययो 'माभूत्' (यथा—उपगुरपत्यम् अस्य देवदत्तस्य) किन्तु प्रथमात् षष्ठ्यन्तात् समर्थादेव प्रत्ययःस्यात्॥ सूत्रे "वा"—ग्रहणात् (उपगोः अपत्यम् इति) वाक्यमपि स्यात्। "दैवयज्ञि" इति सूत्रात् अत्र सूत्रे "अन्यतरस्याम्" ग्रहणानुवृत्तेः "उपगोः अपत्यम्' इत्यत्र समासेन 'उपग्वपत्यम्' इत्यपि भवेत् इति सर्वं प्राक् "समर्थानां प्रथमाद्वा" इति सूत्रे उक्तम्॥ उपगु+अण्= औपगव—अस्य च जातित्वात् "जातेरस्त्री—" इति ङीष् भवेत् ततः 'औपगवी' च लभ्यते। अश्वपति+अण् (अपत्यार्थे)=आश्वपातः, दिति+ण्य (अपत्यार्थे)=

दैता: । उत्स + अञ् (अपत्यं) = औत्स:, स्त्री + नञ् अपत्यं = स्त्रैण:, पुंस् + स्नञ् अपत्यं = पौंस्न: इत्यादि ; पूर्वं सूत्रादिकमुक्तम् ॥ अधुना "तस्यापत्यम्" इति सूत्रप्राप्तं अपत्यशब्दं क्रमप्राप्तं गोत्रशब्दं च व्याख्याति सूत्रकार:—

१०८९ । अपत्यं पौत्रप्रभृति गोत्रम् ।४।१।१६२ ॥

टी—। अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् ।

"Let what is spoken of as posterity (? progeny) beginning with grandson, be called gotra" (Ballantyne). Thus गोत्र here will include grandson etc. Thus in अपत्याधिकार this is the technical sense of the word गोत्र—whereas outside अपत्याधिकार गोत्र means प्रवराध्यायकथितगोत्र ।

(Also see under "एको गोत्रे"—infra) ।

मित—। अत्राधिकारे कोषि इव अपत्यशब्दस्य न केवलं पुत्रवाचकत्वं स्यात्, किन्तु पुत्रपौत्रादिसन्ततिवाचकत्वमेवास्तु, "पङ्क्ति विंशति—" सूत्रे भाष्ये तथा उक्तत्वात् । एवं च गोत्रशब्दस्य सन्ततिवाचकत्वे सति अपत्यस्यापि गोत्रत्वं प्राप्ते, अत्र व्याकरणे पुत्रस्य गोत्रत्वं मास्तु इत्यत: आह—"अपत्यत्वेन विवक्षितं पौत्रादि एव गोत्रसंज्ञं स्यात्" । यस्य य: पौत्रादि: तस्य तद् गोत्रमिति निष्कर्ष: ॥ पौत्रप्रभृति किम् ? अनन्तरस्य अपत्यस्य माभूत् ।

इदमेव अपत्याधिकारे गोत्रशब्दव्याख्यानम्, अन्यत्र गोत्रशब्देन प्रवराध्याय-गोत्रमेव गृह्यते इति उत्तरत्रापि स्फुटीभविष्यति ॥

१०९० । जीवति तु वंश्ये युवा ।४।१।१६३॥

टी—। वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव न तु गोत्रसंज्ञम् ।

Let the fourth descendant in order i.e. the son of a grandson etc, when the original progenitor is living be called

युवन् and not a gotra. Thus the two designations "Gotra" and "Yuvan" are kept distinct here.

मित—। वंशे भव इति वंश्यः (दिगादियत्), वंशोत्पादकइत्यर्थः। एवं वंश्ये उत्पादके पित्रादौ जीवति सति 'पौत्रादेः यदपत्यं सन्ततिः चतुर्थादि' मूलपित्रादेः चतुर्थः सगोत्रः इत्यर्थः 'तद् युवसंज्ञं' स्यात्; न तु पूर्वसूत्रप्राप्तं गोत्रसंज्ञं भवेत्। एवं सति अत्रविषये गोत्रसंज्ञाया समावेशो माभूत्।

१०९१। भ्रातरि च ज्यायसि।४।१।१६४॥

दी—। ज्येष्ठे भ्रातरि जीवति कनीयान् चतुर्थादिः युवसंज्ञश्च स्यात्।

Though original progenitor dies, still the fourth descendent as said in sutra 1090 is called a "yuvan" if the eldest brother is alive.

मित—। "मृतेष्वपि पित्रादिषु ज्येष्ठभ्रातरि जवति (सति) युवसंज्ञार्थमिदं सूत्रम्" इति बालमनोरमा॥ गर्गस्य गोत्रापत्यम्—गार्ग्यः। गार्ग्यस्य द्वौ पुत्रौ, कनीयान् पित्रादौ वंश्ये मृते भ्रातरि ज्यायसि च जीवति युवसंज्ञो भवति।

१०९२। वान्यस्मिन् सपिण्डे स्थविरतरे जीवति।४।१।१६५

दी—। भ्रातुरन्यस्मिन् सपिण्डे स्थविरतरे जीवति पौत्रप्रभृतेः अपत्यं जीवदेव युवसंज्ञं वा स्यात्। एकं जीवतिग्रहणमपत्यस्य विशेषणम्। द्वितीयं सपिण्डस्य। तरब्-निर्देशः उभयोरुत्कर्षार्थः। स्थानेन वयसा चोत्कृष्टे पितृव्ये मातामहे(?) भ्रातरि वा जीवति। गार्ग्यस्यापत्यं गार्ग्यायणः—गार्ग्यो वा।

The living son of grandsons etc. is optionally ("वा") called a yuvan if original progenitor's venerable kindred other than the brother (as said in 1091 sutra) still survives. In

the vritti, of the two जीवत्, one "जीवति" is a predicative adj. of अपत्य, the second जीवत् refers to a सपिण्ड * । The तरप् in स्थविरतर is to denote honour in both place and age. Thus 'if a venerable पितृव्य (uncle), grand-father or his brother (?) survives, then the fourth descendant downwards (पौत्रप्रभृतेः अपत्यम्) is optionally a युवसंज्ञ । Thus we get in such cases both गार्ग्यायण (when a युवसंज्ञा), and गार्ग्य (when not a युवसंज्ञा) ।

मित—। सपिण्डास्तु—स्वयम्, पिता, पितामह, प्रपितामहादि सप्तपुरुषाः । एवमेव मातृकुलेपि गणना, व्याख्यानात् (?) । 'भ्रातुः' ज्येष्ठभ्रातृतः 'अन्यस्मिन् स्थविरतरे' अतिवृद्धे सपिण्डे जीवति सति पौत्रप्रभृतेः अपत्यं 'जीवत्' एव 'युवसंज्ञ' तदाख्यां 'वा' विकल्पेन लभते—इति सूत्रार्थः । वृत्तौ तु 'एकं जीवतिग्रहणं' अपत्यस्य विशेषणं यथा "अपत्यं जीवत् (सत्)", द्वितीयं जीवतिग्रहणं 'सपिण्डस्य विशेषणम्', यथा "सपिण्डे जीवति सति" । तदाह—"स्थानेन वयसा उत्कृष्टे पितृव्ये मातामहे भ्रातरि * वा जीवति" इत्यादि । ['पितामहेभ्रातरि' इत्यत्रैव ज्यायान् पाठः, वृत्तौ यथा] । स्थानतः उत्कृष्ट पितृव्यएव, तस्य पितृस्थानीयत्वात् । वयसा चोत्कृष्ट मातामह एव । अन्यत् स्पष्टम् । गार्ग्यायणः इति युवसंज्ञापक्षे, तदभावे गोत्रसंज्ञायाम् गार्ग्यः एव ।

दी—। 'स्थविर'—इति किम् ? स्थानवयोन्यूने गार्ग्य एव । 'जीवति' इति किम् ? मृते मृतो वा गार्ग्य एव ॥ "वृद्धस्य च पूजायाम् इति वाच्यम्" (वा) ; गोत्रस्यैव वृद्धसंज्ञा प्राचाम् । गोत्रस्य युवसंज्ञा पूजायां गम्यमानायाम् । तत्रभवान् गार्ग्यायणः । 'पूजा' इति किम् ? गार्ग्यः । "यूनश्च कुत्सायाम् गोत्रसंज्ञेति

---

* The सपिण्ड are self, father, grand-father, great-grand-father &c. up to the 7th genarations in father's side. Cp. "सप्तपुरुषावधिज्ञातयः सपिण्डाः" । So prefer the reading पितामहे भ्रातरि here.

वात्स्यम् (वा-)—गार्ग्यो जाल्मः। 'कुत्सा'—इति किम् ? गार्ग्यायणः।

Why do we say स्थविरतरे in the sutra and vritti ? If the living सपिण्ड is inferior by place and age then no युवसंज्ञा arises and we get गार्ग्य (with गोत्रसंज्ञा)। Why do we say 'जीवति' here ? If the upward सपिन्ड is dead or if the fourth अपत्य is dead then by गोत्रसंज्ञा we get गार्ग्यः only, and not गार्ग्यायणः by युवसंज्ञा। Again if a Gotra is honoured, then it gets युवसंज्ञा thus we have तत्रभवान् गार्ग्यायणः[here तत्रभवान् इति सुप् सुपा—(कर्मधा ?) implies पूजा] ; in the varttika here "वृद्धस्य" acc. to old professors means "गोत्रस्य"। Why do we here say पूजायाम्—witness गार्ग्य as without युवसंज्ञा for no पूजा is implied here. Again in case of censure (कुत्सा) the युवसंज्ञा is termed as गोत्रसंज्ञा। Then गार्ग्यः जाल्मः (the wicked descendant of गर्ग), here जाल्म implies "censure." why do we say 'कुत्सा' here ? witness गार्ग्यायणः with—युवप्रत्यय, when no कुत्सा is denoted.

मित—। सूत्रे कथं 'स्थविरतरे' उक्तम् इति आह ? सपिण्डे स्थानतः वयसा वा न्यूने सति युवसंज्ञा यथा न स्यात्। 'जीवति' ग्रहणात्, सपिण्डे मृते युवसंज्ञा न स्यात्, अत आह—"मृते मृतो वा गार्ग्य एव"॥ अत्र वार्त्तिकस्थं वृद्धशब्दं व्याख्याति—'वृद्धस्य' इति गोत्रस्यार्थे प्रयुक्तः, अतः अर्थो यथा—गोत्रस्य पूजायाम् युवसंज्ञा स्यात्। एवम् उदाहरणे 'तत्रभवान्' इति पूजावाची शब्दः—"तत्रभवान् गार्ग्यायणः" = पूज्यः गार्ग्यायणः। पूजायाम् अगम्यमानायाम् युवसंज्ञा न स्यात्, यथा गार्ग्य इति॥ 'यूनश्च'—इत्यादि वार्त्तिके "गार्ग्यः जाल्मः" इति उदाहरणे—तथा च बालमनोरमायाम्—"यो वृद्धाननादृत्य स्वातन्त्र्यं भजते तद्विषयमिदम्"—कुत्सा-द्योतनाय जाल्मशब्दः व्यवहृतः। असत्यां निन्दायाम् युवसंज्ञायां—गार्ग्यायणः इति॥

१०८३। एको गोत्रे ।४।१।८३॥

टी—। गोत्रे एक एवापत्यप्रत्ययः स्यात्। उपगोर्गोत्रापत्यम् औपगवः। गार्ग्यः। नाड़ायनः।

"गोत्रे स्वैकोनसंख्यानां प्रत्ययानां परम्परा।
यद्वा स्वयूनसंख्येभ्योऽनिष्टोत्पत्तिः प्रसज्यते ॥ १ ॥
अपत्यं पितुरेव स्यात्ततः प्राचामपीति च।
मतभेदेन तद्वान्ये सूत्रमेतत्तथोत्तरम् ॥"२ ॥

पितुरेवापत्यमिति पक्षे ह्युपगोस्तृतीये वाच्ये औपगवादिञ् स्यात्। चतुर्थे त्वजीवज्ज्येष्ठे मृतवंश्ये औपगविः फक्। इत्थं फजिञोः परम्परायां मूलाच्छततमे गोत्रे एकोनशतं प्रत्ययाः स्युः। पितामहादीनामपीति मुख्यपक्षे तु तृतीये वाच्ये उपगोरण् इष्टे सिद्धे अपि अस्मात्तादिञ् अपि स्यात्। ततश्चतुर्थे फगिति फगिञोः परम्परायां शततमे गोत्रे अष्टनवतेः अनिष्टप्रत्ययाः स्युः। अतो नियमार्थमिदं सूत्रम्। एवमुत्तरसूत्रे अपूर्ह्यम्।

Only one अपत्यप्रत्यय is to be attached to a word in the sense of गोत्र (i.e. गोत्रापत्य)। Thus उपगोः अपत्यम् (सन्तति) will give औपगवः (with अण्); further इञ् after औपगव in the sense of his गोत्रापत्य again, will not be attached ; for this purpose in view this sutra is made, similarly गर्गस्य गौत्रापत्य will give गार्ग्य only (with one अपत्यप्रत्यय); thus we get नाड़ायन also with नड़ादि फक् in the sense of गोत्रापत्य। There are two views that अपत्य means (i) son only ; also (ii) progeny in general (i.e. son and grandson) some grammarians take अपत्य in the sense of "son" (पुत्र) only,

whereas Panini takes अपत्य here in the sense of progeny in general (सन्ततिवाचक) i. e. he includes पौत्र also ; this is said in the sutra "अपत्यं पौत्रप्रभृति गोत्रम् ।" Thus acc. to Panini. the third descendent (पौत्र) is "gotra" (गोत्रापत्य) whereas in some senses the fourth one (प्रपौत्र) is युवा—[and son is अनन्तरापत्य] ; and diff. affixes are enjoined in these diff. technical senses. Now in order that affix after affix (i.e. one तद्धितप्रत्यय after another in the same (अपत्य) sense after one original word) may not be attached in the sense of गोत्रापत्य, the present sutra is made as "एको गोत्रे" । Thus we have in the sloka "तद्ध ह्यार्थं सूत्रमेतत् तयोत्तरम्"। Thus again in the view that अपत्य is of father only ("अपत्यम् पितुरेव स्यात्"), if this present rule is not made, then after one original word as उपगु &c, affix after affix i.e. अपत्यप्रत्यय after अपत्यप्रत्यय, in the sense of तस्य अपत्यम् will go on, one after another in succession till in the case of 100th generation 99 अपत्यप्रत्यय will be attached (e. g.)—उपगोरपत्यम् = उपगु + अण् = औपगव ; then औपगवस्य अपत्यम will yield औपगवि with इञ्, then again औपगवेः अपत्यम् will give औपगवायन with फक् by "यञिञोश्च" & so on, but as this rule restricts only one अपत्य-प्रत्यय in the sense of गोत्रापत्य, so in a series of 100 affixes, 99 affixes will be illegible (अनिष्ट), (comp "गोत्रे खं कोनसंख्यानां प्रत्ययानां परम्परा प्रसज्यते") । Lastly in the view that अपत्य is of grandfather also (ततः प्राचामपौति) i,e. अपत्य = पौत्र ; then in the case of 100 अपत्यप्रत्यय after उपगु etc, as shown above first two अपत्य प्रत्यय one denoting son, another grandson will be correct ; in other words here (then) 98 affixes will be illegal ; thus in this case

in a serial order of अपत्यप्रत्यय, illegebility will be in all अपत्यप्रत्यय lessened by 2 from the original root-प्रत्यय (thus in 1oo अपत्य प्रत्यय, 1oo—2=98 will be अनिष्ट प्रत्ययमाला)—(comp"स्वयूनसंख्येभ्य: अनिष्टोत्पत्ति: प्रसज्यते")। Bhattoji later explains the gist of these two slokas "गोत्रे स्वं कोन—सूत्रमेतत्तथोत्तरम्", by पितुरेव अपत्यमिति पक्षे &c. explaining the view that son (अपत्य) is of father only. In this case the third generation from उपगु will be औपगवि (with इञ after औपगव, the 2nd generation),then in the fourth generation (descendant) [where ज्येष्ठ is not living] [or—where original वंशप्रवर्त्तक is dead] युवसंज्ञा being barred (see rules "जीवति तु वंश्ये युवा" and "भ्रातरि च ज्यायसि") we get गोत्रसंज्ञा, and then गोत्रार्थक फक् will give औपगवायन। Thus फक् and इञ going on serially, in 1oo the गोत्र from the original, 1oo affixes will be attached (of these 99 will be illegal "स्वस्मात् एकोनसंख्यानां अनिष्टप्रत्ययानां परम्परा उक्तरीत्या प्रसज्यते"); In the original view (मुख्यश्च) that अपत्य is of grand-father also then the third generation of उपगु being meant, अण् will first give औपगव—even then इञ after this अदन्त word will come yielding औपगवि; then after this औपगवि there is फक् in the fourth generation. Thus फक् and इञ following on in cyclic order in the 1oo gotra pratyayas 98 undesirable affixes will come in. To check this fault this present sutra is made. This is also to be understood in the following rule.

मित—। अपत्याधिकारात् "एको गोत्रे" इत्यत्र, 'एक' इत्यनेन 'एक अपत्यप्रत्यय:' इति गम्यते। 'एक' इति विशिष्य कथनात्, अधिक: प्रत्यय: न भवति, अत आह— "गोत्रे एक एव अपत्यप्रत्यय: स्यात्"। उदाहरणं यथा—उपगो: अपत्यम् इति उपगु+अण् औपगव:। अस्मात्—औपगवस्य अपत्यम् इति औपगव+इञ=

औपगवि ("अत इञ्" इति इञ्)—इति द्वितीयः अपत्यप्रत्ययो यथा न स्यात्, अत विशिष्य आह—'एक एव अपत्यप्रत्ययः स्यात्" । अपत्यशब्दस्तु पुत्रे एव रूढ़ः इति केषाञ्चित् मतम् = इति प्रथमपक्षे तु उक्तं सङ्गच्छते । किन्तु अपत्यशब्दः सन्तानवाची सन् पौत्रेऽपि रूढ़ इति पौत्रस्याप्यपत्यत्वेन विवक्षिते, अपत्यत्वादस्य गोत्रत्वे सति इति द्वितीयपक्षे तु "औपगवि" इति प्रयोगः साधुः, किन्तु पुनः औपगवेः अपत्यम् इत्यत्र चतुर्थे वंश्ये वाच्ये औपगव + फक् ("यञिञोश्च" इतिफक्) = औपगवायनः इति तु असाधुरेव । यतः चतुर्थादि अपत्यं न गोत्रं किन्तु युवसंज्ञमेव । गोत्रविषये एव एक अपत्यप्रत्ययः यथा स्यात् इत्येवमर्थं सूत्रं विहितम् स्यात् । एवं प्रथमपक्षे (अपत्यशब्दस्य पुत्रत्वपक्षे)—अपत्यार्थे प्रत्ययपरम्परायां विहितायाम्, (उपगोरपत्यम् औपगवः, औपगवस्यापत्यं औपगविः, तस्यापत्यं औपगवायनः इति परम्परायां विहितायाम्) एक एव साधुः, अन्ये प्रत्ययाः अनिष्टा एव । एवं क्रमेण शततमे अपत्यप्रत्यये सति,—एकोनशतं अनिष्टाः प्रसज्यन्ते । यत्संख्यकाः अपत्यप्रत्ययाः विहिता ततः एकोनसंख्यानां प्रत्ययानाम् अनिष्टत्वं गम्यते एव । द्वितीयपक्षे (अपत्यशब्दस्य सन्तानसाधारण्येन पौत्रत्वेऽपि योत्ये) तु, अपत्यार्थे द्वौ प्रत्ययौ भवतः—यथा उपगोरपत्यं औपगवः, तस्य पुनः अपत्यं औपगव + इञ = औपगविः इति । अस्मात् औपगविशब्दात् पुनः अपत्यप्रत्यये सति (औपगवि + फक् इत्यत्र) एकमनिष्टं स्यात् । एवं त्रितये अपत्यप्रत्यये सति—एकमनिष्टं प्रसज्यते । ततश्च अनेनक्रमेण शततमे अपत्यप्रत्यये सति अष्टनवतिरनिष्टप्रत्ययाः स्युः । अतोऽत्र यत्संख्यका प्रत्ययाः ततः द्वि-न्यूनसंख्यकाः एव अनिष्टप्रत्ययाः प्रसज्यन्ते । द्वितीयपक्षस्तु मुख्यपक्षः पाणिनिसम्मतः,—एषोऽर्थः "अपत्यं पौत्रप्रभृति गोत्रम्" इति सूत्रस्य टीकातः । सर्वमेतत् अभिप्रेत्याह श्लोकद्वयेन गोत्रेति—तद्व्याख्या—"गोत्रे (प्रथमपक्षे इत्यर्थः) स्वैकोनसंख्यानां प्रत्ययानां परम्परा (अनिष्टपरम्परा इत्यर्थः) प्रसज्यते, यद्वा (द्वितीयपक्षे इत्यर्थः), स्व-द्व्यूनसंख्यकेभ्यः (प्रत्ययेभ्यः) अनिष्टोत्पत्तिः प्रसज्यते । "अपत्यं पितुरेव स्यात्", "ततः प्राचाम् अपि" (पितामहादीनामपि पौत्रः अपत्यं स्यात् इत्यर्थः)"—इति मतभेदेन हेतुना (गोत्रे उक्ता द्विप्रकारम् अनिष्टप्रत्ययपरम्परा प्रसज्यते) । तद् हानैः (तदनिष्टप्रत्ययपरम्परा-

स्यागाय) एतत् सूत्रम् ("एको गोत्रे" इति सूत्रं कृतम्) तथा उत्तरसूत्रम् (यथा, "गोत्राद्-यून्यस्त्रियाम्" इति उत्तरसूत्रम् कृतम्)। अधुना भट्टोजिरिव श्लोकवार्त्तिकं व्याख्यास्यन् प्रथमपक्षमाह—"पितेव अपत्यम्" इति पक्षे (प्रथमपक्षे इत्यर्थः) उपगोस्तृतीये वाच्ये औपगवादिञ स्यात्"—(यथा—उपगु+अण्=औपगवः, औपगवस्य इति औपगव+इञ्=औपगवि i. e. उपगोः तृतीयः वंशधरः)। जीवन् ज्येष्ठः यस्य इति जीवज्ज्येष्ठः, ज्येष्ठे जीवति चतुर्थस्य युवसंज्ञा, अत आह—'अजीवज्ज्येष्ठे'—(तथा च सूत्रं "भ्रातरि च ज्यायसि"); मृतः वंश्यो यस्य इति मृतवंश्यः, "वंश्ये-पित्रादौ जीवति युवसंज्ञा स्यात्" इति युवसंज्ञां वारयन्नाह 'मृतवंश्ये' इति। एवं पक्षे उपगोः चतुर्थे वाच्ये औपगवेः फक् स्यात् ("यञिञोश्च" इति सूत्रेण फक् स्यात्) ततः औपगवायन इति भवति। "इत्थं फगिञोः प्रत्ययपरम्परायां सत्यां मूलात् शततमे गोत्रे एकोनशत-प्रत्ययाः स्युः—"शततमे गोत्रप्रत्यये सति एकोनशतं प्रत्ययाः अनिष्टाः स्युः इत्यर्थः। अतः श्लोके इममेव प्रथमपक्षमुद्दिश्य आह—"गोत्रे स्वैकोनसंख्यानां प्रत्ययानाम् अनिष्टपरम्परा प्रसज्यते" इति। भट्टोजिरधुना द्वितीयपक्षमाह—"पितामहादीनामपि (पौत्रं अपत्यं स्यात्)—इति मुख्यपक्षे (पाणिनीयपक्षे) तु तृतीये वाच्ये (उपगोः तृतीयवंशधरे पौत्रे वाच्ये) उपगोः अणा इष्टसिद्धे अपि (अण् प्रत्ययेन-औपगव-शब्देन पुत्रत्वे सिद्धे अपि) अणन्तात् (औपगवशब्दात्) इञ अपि स्यात् (पौत्रस्यापि अपत्यत्वेन विवक्षितत्वात् गोत्रत्वात् तद्द्योतनाय औपगवशब्दात् "अतइञ्" इति इञपि इष्टः स्यात्)। ततः चतुर्थे (वंशधरे वाच्ये) फक् ("यञिञोश्च" इतिसूत्रेण फक्) स्यात्, इति (क्रमेण) फगिञोः (अकारान्तात् इञ्, पुनः इञन्तात् फक् इति) परम्परायां शततमगोत्रे (गोत्रप्रत्यये इत्यर्थः) अष्टनवतेः (प्रकृतिभ्यः, शब्देभ्यः इत्यर्थः) अनिष्टप्रत्ययाः स्युः"। एवं यथा न स्यात् अतः नियमार्थम् इदं सूत्रम् ("एकोगोत्रे" इति सूत्रं विहितम्)। एवम् एषोर्थः "उत्तरसूत्रेपि,"—"गोत्राद् यून्यस्त्रियाम्" इति उत्तर-सूत्रेपि ऊह्यम्—एषोर्थः तत्रापि नेयः बोध्यो वा इत्यर्थः।

१०९४। गोत्राद्यून्यस्त्रियाम्। ४।१।९४॥

दी—। यून्यपत्ये गोत्रप्रत्ययान्तादेव अपत्यप्रत्ययः स्यात्, स्त्रियां तु न यूवसंज्ञा। गर्गस्य यूवापत्यं गार्ग्यायणः। स्त्रियां गोत्रत्वादेक एव प्रत्ययः।

When युवापत्य is implied then अपत्यप्रत्यय arises after a word ending in गोत्रप्रत्यय; but this युवसंज्ञा does not attach in the feminine gender. Thus in masculine only युवसंज्ञा is attached. For example गर्गस्ययुवापत्यम् = गार्ग्यायणः (with फक्), First गर्गस्य गोत्रापत्यं gives गर्ग + यञ् = गार्ग्य (by "गर्गादिभ्यो यञ्") then गार्ग्यस्य युवापत्यं (चतुर्थादि) = गार्ग्य + फक् = गार्ग्यायणः (by "यञिञोश्च")। As युवसंज्ञा does not arise in the fem. so in fem., only one गोत्रप्रत्यय comes in i.e., females cannot come within the denotation of युवसंज्ञा। The clause "स्त्रियां तु न युवसंज्ञा, स्त्रियां गोत्रत्वात् एक एव प्रत्ययः" is got from योगविभाग of the word "अस्त्रियाम्" in the sutra.

[N. B.—Each Sutra of Panini is called a योग। Words in a योग or sutra are called एकयोगस्थ। The separation however of a word or a portion from a sutra is called योगविभाग]।

मित—। युवापत्ये विवक्षिते, गोत्रप्रत्ययान्तात् एव अपत्यप्रत्ययः भवति। "अस्त्रियाम्" इति पदस्य योगविभागात् "स्त्रियां तु न युवसंज्ञा" इति लभ्यते। अतः स्त्री उक्तयुवसंज्ञा न स्यात् इति फलितत्वात् आह—"स्त्रियां गोत्रत्वात् एक एव प्रत्ययः" इति। उदाहरणं यथा—गर्गस्य युवापत्यम् इत्यर्थे—प्रथमं गर्गस्य गोत्रापत्यार्थे गर्ग + यञ = गार्ग्य ("गर्गादिभ्योयञ्") इति गोत्रप्रत्ययान्तशब्दे प्राप्ते, अस्मात् एव 'गार्ग्य'—शब्दात् युवापत्ये "यञिञोश्च" इति फकि गार्ग्यायणः इति लभ्यते। स्त्रियां गोत्रत्वात् एकएव गोत्रप्रत्यये, ततः ङीपि गार्गी इत्येव भवेत्। अत्रापि स्त्रीभिन्नयूनि एक एव प्रत्ययः स्यात् इति पूर्वसूत्रे उक्तम्॥

१०८५। अत इञ्। ४।१।८५॥

दी—। अदन्तं यत् प्रातिपदिकं तत्प्रकृतिकात् षष्ठ्यन्तात् इञ् स्यात् अपत्ये अर्थे। दाक्षिः।

The original अदन्त base (base ending in अकार) after which the षष्ठी विभक्ति has been added (in course of अपत्याधिकार) takes the affix इञ् in the sense of अपत्य (descendant सन्तति)। Thus दक्षस्य अपत्यं gives दक्ष+इञ्=दाक्षिः। Similarly दाशरथि is got. [The use दाशरथ in "प्रदीयतां दाशरथाय मैथिली" etc is आर्ष, or is defended with अण् in the general sense "तस्येदम्"। Thus Bhattoji in his Manorama says "कथं तर्हि 'प्रदीयतां दाशरथाय मैथिली' इति? अपत्यरूपविशेषस्याविवक्षायां शैषिकोऽण्"]।

मित—। 'अत' इति तदन्तविधिर्बोध्यः। तत आह—अदन्तात् प्रातिपदिकात् इत्यर्थः। "तस्यापत्यम्", "समर्थानां प्रथमाद्वा" इत्यनुवर्त्त्या आह—"अदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात् षष्ठ्यन्तात् इञस्यात्"। प्रथमोच्चारित-तच्छब्दबोधितात् षष्ठ्यन्तात् प्रातिपदिकात् इति निष्कर्षः। अन्यत्सुगमम्॥

१०८६। बाह्वादिभ्यश्च। ४।१।८६॥

दी—। बाहविः। औडुलोमिः। आकृतिगणोऽयम्॥

Words of the बाहु class (बाहु here refers to "the name of a sage") take इञ् in the sense of अपत्य (descendant). Thus बाहु+इञ=बाहवि (son etc of the sage बाहु)।

मित—। सुगमा। बाहु+इञ (ततः "ओर्गुणः" इति गुणेसति)=बाहविः (बाहुनामक ऋषेरपत्यमित्यर्थः)। उडुलोमन्+इञ्=("नस्तद्धिते" इति टिलोपे सति) औडुलोम्+इञ्=औडुलोमिः॥ बाह्वादिगणो यथा—बाहु, उपबाहु, उपवाकु, निवाकु, बटाकु, उपबिन्दु, वृषली, वृकला, चूड़ा, वलाका, मूषिका, कुशला, छगला, ध्रुवका, सुमित्रा, दुर्मित्रा, पुष्करसद्, अनुहरत्,

देवशर्मन्, अग्निशर्मन्, भद्रशर्मन्, सुशर्मन्, कुनामन्, सुनामन्, पञ्चन्, सप्तन्, अष्टन्, अमितौजसः सलोपश्च, सुधावन्, उदञ्च, माव, शिरस्, शराविन्, मरीचिन्, चर्मवङ्गिन्, शृङ्खलतोदिन्, खरनादिन्, नगमर्दिन्, प्राकारमर्दिन्, लोमन्, अजीगर्त्त, कृष्ण, युधिष्ठिर, अर्जुन, साम्ब, गद, प्रद्युम्न, राम, उदङ्क, उदकसंज्ञायाम्, सम्भूयोम्भसोः सलोपश्च ।— आकृतिगणोयम् । तेन—सातयकि, जाङ्घि, शौरि, ऐन्द्रशर्मि, आजधेनवि, सावर्णि इत्यादि—सिद्धम् ॥

१०८७ । सुधातुरकङ् च । ८।४।१।८ ॥

दी—। चादिञ् । सुधातुरपत्यं सौधातकिः ॥ व्यास-वरुड़-निषाद-चण्डालविम्वानां चेति वक्तव्यम् (वा)—॥

The word सुधातृ takes इञ् in the sense of तस्यापत्य (his descendant) and then अकङ् is added to the base. Thus सुधातृ + इञ् = सुधात् अक (ङित्वाद् अन्त्यादेशः) + इञ् = सौधातकि । The words व्यास, वरुड़, निषाद, चण्डाल, विम्व take इञ् in the sense of अपत्य and then अकङ् is added to these words. Thus there being व्यास (अक्) + इञ्, we look forward—

मित—। सुधातृ शब्दात् अपत्यार्थे इञ्-प्रत्ययः स्यात्, प्रकृतेः अकङादेशश्च इति सूत्रार्थः । ततः सुधातृ + इञ् इतिस्थिते प्रकृतेः सुधातृ-शब्दस्य अकङादेशः । ङित्त्वात् अन्त्यादेशेसति सुधातृ अकङ + इञ् इति जाते आदिवृद्धौ—सौधातकिः । व्यास—वरुड़—निषाद—चण्डाल—विम्व-शब्दाद् अपत्यार्थे इञप्रत्ययः प्रकृतेः अकङ् आदेशश्च । ततः व्यास (अकङ) + इञ् इति स्थिते आह—

१०८८ । न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् । ७।३।३॥

दी—। पदान्ताभ्यां यकार-वकाराभ्यां परस्य न वृद्धिः, किंतु ताभ्यां पूर्वौ क्रमात् ऐचौ आगमौ स्तः । वैयासकिः । वारुड़किः इत्यादि ।

The usual वृद्धि does not come in case of a vowel that follows पदान्त यकार or व-कार, but the augments ऐच् and औच् are respectively attached before these य् and व्। Thus we get वैयासकि (with इञ् and अकङ्-आदेश after व्यास)। Similarly वारुड़कि etc.

मित—। य्‌च व्‌च य्वौ (द्वन्द्वः)। ताभ्याम् (५मी द्विवचन); अत आह—"यकारवकाराभ्याम् परस्य"। 'पदान्ताभ्याम्' इति विशेषणम्। "मृजेर्वृद्धिः" इतातःअनुवृत्तिलभ्यं वृद्धिशब्दम् आकृष्य शेषपूरणेन आह—"न वृद्धिः"। "ऐच्" इति प्रत्याहारः। यथाक्रमं यकारात् पूर्वं ऐच्, वकारात् पूर्वं औच्। अत आह—ताभ्यां पूर्वौ क्रमात् ऐचौ आगमौ स्तः। व्यासशब्देन अत्र वेदव्यासः (पुराण-भारतादिप्रणेता एव लक्ष्यते (नामैकदेशग्रहणम्)। व्यास+अकङ्+इञ इति स्थिते व्यासक्+इञ इत्यत्र वृद्धिं वाधित्वा पदान्त—य-कारस्थाने 'ऐ' आगमे सति वैयासक+इञ=वैयासकिः (सिद्धः)। एवं वरुड़शब्दात् अपत्यं 'वारुड़किः', निषादात्=नैषादकिः, चन्डालात्=चान्डालकि, विम्बात्=वैम्बकिः।

१०९९। गोत्रे कुञ्जादिभ्यः च्फञ् ४।१।९८ ॥

११००। व्रात-च्फञोरस्त्रियाम् ।५।३।११३ ॥

टी—। व्रातवाचिभ्यः च्फञन्तेभ्यश्च स्वार्थे ञ्यः स्यात् न तु स्त्रियाम्। कौञ्जायन्यः। वहुत्वे तद्राजत्वात् लुग्वक्ष्यते। ब्राध्नायन्यः। स्त्रियाम्—कौञ्जायनी; गोत्रत्वेन जातित्वात् ङीष्। अनन्तरापत्ये कौञ्जिः।

Words of the कुञ्ज class take च्-फञ् in the sense of गोत्र (पौत्र प्रभृति) and not अपत्य in general. Then again the स्वार्थिक affix ञ्य comes after words denoting व्रात (a whole host—समूह) and words ending in the affix च्-फञ, but this स्वार्थिक affix does not come in the feminine. Thus कुञ्ज+च्-फञ (आयन)=कौञ्जयन+ञ्य

(स्वार्थिक)=कौञ्जायन्य। In the plural number this ञ्य elides because in the plural this is called तद्राज by the rule "ञ्यादयस्तद्राजा" (५।३।११९) and then लुक् comes in by "तद्राजस्य बहुषु लुक—"; thus ब्राध्नायन्य like कौञ्जायन्य। In the fem. however ञ्य not coming in, we get कौञ्जायनी—ङीष् comes because it is जातिवाचक being गोत्र प्रत्ययान्त शब्द (see the rule जातेरस्त्रीविषयात् अयोपधात्)। But in the sense of अनन्तरापत्य i.e. son only, the rule "गोत्रे कुञ्जादिभ्यः" does not apply (for this rule directs फञ् in the sense of गोत्र) and then इञ् by "अत इञ्" comes giving कौञ्जि।

मित—। व्रातश्च चफञ् च इति द्वन्द्वः ततः पञ्चम्यर्थे षष्ठी, अतः वृत्तौ आह—'व्रातवाचिभ्यः च्फञन्तेभ्यश्च' इति। कौञ्जायन्य इति स्वार्थे ञ्ये सति सिद्धः इति स्पष्टम्। 'बहुत्वे' बहुवचने—"ञ्यादयस्तद्राजा" इति सूत्रात्—'तद्राजत्वात् लुक् वक्ष्यते' ("तद्राजस्य बहुषु तेनैवास्त्रियाम्" इति हि सूत्रम्)। ब्रध्न-शब्दस्य कुञ्जादिपाठात् "गोत्रे कुञ्जादिभ्यः च्फञ्"। ततः स्वार्थे ञ्यः ; 'ञ'—इत्वात् तद्धिते आदिवृद्धिः। स्त्रियां स्वार्थिक-ञ्य प्रत्ययस्य निषेधात् 'कौञ्जायनी' इति। 'कौञ्जायन' इत्यत्र अदन्तत्वात् टाप् न स्यात्—यतः गोत्रेन जातित्वात् ("जातेरस्त्रीविषयात् अयोपधात्" इतिसूत्रं द्रष्टव्यम्) ङीष् भवति। अत्रसूत्रे गोत्रग्रहणात् (गोत्रस्य च पौत्रादित्वे उक्तत्वात्), अनन्तरापत्ये (पुत्रार्थे इत्यर्थः) च्फञ् न स्यात्, किन्तु कुञ्जादि-शब्दस्य अदन्तत्वात् "अत इञ्" इति इञिसति 'कौञ्जिः' इत्यादि भवति॥

११०१। नड़ादिभ्यः फक् ४।१।९९॥

टी—। गोत्रे इत्येव। नाड़ायनः। चारायणः। अनन्तरो नाड़िः।

Words of the नड़ादि class take the affix फक् in the sense of गोत्र (i. e. in the sense of grandson &c. see rule 1100 also). Thus we get नड़+फक्=नड़+आयन=नाड़ायनः (कित्त्वात् तद्धिते आदि-

वृद्धि:) &c. But this फक् does not come in the sense of an immediate descendant i. e. son, and then we get नड़+इञ् (by "अत इञ्") = नाड़ि: ।

मित— । सुगमा ॥ फक्स्थाने 'आयन' स्यात्, अत: नड़+आयन=नाडायन: (आदिवृद्धि:) । गोत्रस्य पाणिनिमते पौत्रादित्वात् अनन्तरापत्यस्य पुत्रत्वात् एव गोत्रत्वाभावात्, अत्र नड़ादिगणे गोत्रानुवर्त्तनात् अनन्तरापत्यस्य "अत इञ्" (अपत्यार्थे) इति इञ् एव स्यात्, तत: नड़+इञ् इति नाड़ि: ॥ नड़ादिगणो यथा—नड़, चर, वक, मुञ्ज, इतिक, इतिश, उपक, एक, लमक, शलङ्कु शलङ्क (च) सप्तल, वाजप्य, तिक, अग्निशर्मन्, वृषगणे. प्राण, नर, सायक दास, मित्र, द्वीप, पिङ्गर, पिङ्गल, किङ्कर, किङ्कल, काश्यप, कातर, कातल, काश्य, काव्य, अज, अमुष्य, कृष्णरणौ, ब्राह्मणवासिष्ठे, अवित्र, लिगु, चित्र, कुमार, क्रोष्टु, प्रोष्ट च, लौह, दुर्ग, स्तम्भ, शिंशपा, अग्रतृण, शकट, सुमनस्, सुमत, मिमत, ऋच्, जलन्धर, अध्वर, युगन्धर, हंसक, दण्डिन्, पिण्ड, पञ्चाल, चमसिन्, सुकृत्य, स्थिरक, ब्राह्मण, चटक, वदर, अश्वल, खरप, लङ्क, इन्ध, अस्त, कामुक, ब्रह्मदत्त, उदुम्बर, शोण, अलोह, दण्ड । इति नड़ादि: ॥

११०३ । हरितादिभ्योऽञः ।४।१।१०० ॥

टी— । एभ्योऽञन्तेभ्यो यूनि फक् । हारितायन: । इह गोत्राधिकारेऽपि सामर्थ्याद् यून्ययम् । नहि गोत्रादपरो गोत्रप्रत्यय: । विदाद्यन्तर्गणो हरितादि: ।

The affix फक् (आयन) comes in the sense of युवप्रत्यय after words of the हरित class that has already taken the affix अञ् in the sense of गोत्रापत्य (पौत्र) । Thus हरित+अञ् (विदादि – अञ्) = हारित: । तस्य युवापत्यम् = हारित+फक् = हारित+ आयन = हारितायन: । The affix फक् here though enumerated and enjoined within the jurisdiction of गोत्रप्रत्यय, still it is to be understood in the sense of युवप्रत्यय, for हरितादि words are already mentioned in

the विदादि class and that class takes अञ् in the sense of गोत्र; so if a further अपत्यप्रत्यय is to be made after हरितादि words ending in गोत्रप्रत्यय अञ्, then that affix (प्रत्यय) is to be taken in the sense of युवापत्य, and because the rule "एकोगोत्रे" declares that a further गोत्रप्रत्यय is not to come after a गोत्र-प्रत्ययान्त word, so Bhattoji says "इह गोत्राधिकारे अपि सामर्थ्याद्यूनि अयम्। न हि गोत्रादपरो गोत्रप्रत्ययः &c".

मित—। गोत्रार्थे अञन्तेभ्यः हरितादिभ्यः फक् स्यात्। कथं गोत्रार्थे अञन्तेभ्यः इति विज्ञायते? हरितादयः विदाद्यन्तर्गणाः, स च गणः गोत्रार्थे एव अञ्प्रत्ययं लभते, "अनृष्यानन्तर्ये विदादिभ्योञ्" इति हि सूत्रम्। अतः अत्र इदमेव नाय्यं व्याख्यानम्। ततश्च ज्ञायते फक् यूनि एव स्यात्। अतः आह "इह गोत्राधिकारेपि सामर्थ्याद्यूनि फक्" इत्यादि। "एको गोत्रे" इति सूत्रात् च ज्ञायते यत् गोत्रप्रत्ययान्तात् अपरो गोत्रप्रत्ययो न भवति—ततोपि सुष्पष्टमेव यत्—फक् (आयन) यूनि एव स्यात्। किन्तु अत्र गोत्राधिकारस्य उत्तरार्थः। अत्र फक्प्रत्यय इञ्प्रत्ययं बाधते। हरितादिर्यथा—हरित, किन्दास, वह्यस्क, अर्कलूष, वध्योग, विष्णुवृद्ध, प्रतिबोध, रथन्तर, रथीतर, गविष्ठिर, निषाद, शबर, अलस, मठर, सृपाकु, मृदु, पुनर्भू, पुत्र, दुहितृ, ननान्दृ, परस्त्री, परशु च॥

११०३। यञिञोश्च। ४।१।१०१॥

दी—। गोत्रे यौ यञिञौ तदन्तात् फक्स्यात्। 'अनाति-' इत्युक्तेः 'आपत्यस्य' (सू १०८२) इति यलोपेन। गार्ग्यायणः। दाक्षायणः।

The words ending in यञ् and इञ् in गोत्राधिकार i.e., words after which गोत्रप्रत्यय यञ् and general अपत्यप्रत्ययं इञ् are attached take फक् in the sense of युवप्रत्यय। That फक् is in the sense of युवप्रत्यय is by inference as in the case of the sutra हरितादिभ्योञः।

See "सामर्थ्यात् यूनि अयम्" (in the previous rule). Thus गर्ग + गोत्रापत्य यञ् by गर्गादिभ्योयञ् = गार्ग्य । Then गार्ग्य + फक् (आयन) गार्ग्यायण: (without य-लोप) । गार्ग्य ends in अपत्य य-प्रत्यय and य-प्रत्यय comes after ग्, a हल् letter, so the rule "आपत्यस्य च तद्धिते अनाति" should direct elision of this य, when a further तद्धित affix follows ; but as this rule by 'अनाति' says that this elision of य is not to take place when an affix beginning with आ follows, so here in गार्ग्य + आयन, the य does not elide yielding गार्ग्यायण: । Similarly दक्ष + इञ (अपत्य) = दाक्षि, then दाक्षि + फक्(आयन) = दाक्षायण ।

मित— । 'तदन्तात् फक्' इति = सामर्थ्यात् अयं फक्प्रत्ययो यूनि एव स्यात् । यत: गोत्रप्रत्ययात् अपरो गोत्रप्रत्ययो न भवति, "एकोगोत्रे" इति मत्यात् । सर्वमेतत् पूर्वसूत्रे कथितम् । तत: गर्ग + गोत्रपत्यं यञ् ("गर्गादिभ्यो यञ्" इति) = गार्ग्य । तत: युवापत्यं गार्ग्य + फक् (अनेन सूत्रेण) = गार्ग्यायण । 'गार्ग्य + आयन'—इत्यत्र यद्यपि अपत्य—यप्रत्ययो हल: पर एव, तथापि न लुप्यते, यत: परत: आयनप्रत्ययस्य आकार: अस्त्येव । "आपत्यस्य—च तद्धिते अनाति: इति सूत्रे 'आति'—लोप: न स्यात् आकारे परे—इति व्याख्यानात्, अत: आह—"अनातिइत्युक्ते:···यलोपोन" । दाक्षायण इत्यत्र तु दक्ष + अपत्य इञ् = दाक्षि ; तत: इञन्तात् फक् ज्ञेय: । दाक्षि + आयन = दाक्षायण: ।

११०४ । शरद्वच् – शुनक – दर्भाद् भृगु – वत्साग्रायणेषु । ४।१।१०२ ॥

टी— । गोत्रे फक् । अञिञोरपवाद: । आद्यौ विदादौ । शारद्वतायनो भार्गवश्चेत्, शारद्वतोऽन्य: । शौनकायन: वात्स्यश्चेत्, शौनकोन्य: । दार्भायण: आग्रायणश्चेत् । दार्भिरन्य: ।

The words शरद्वत्, शुनक and दर्भ take the affix फक् in the sense of गोत्रापत्य, provided these respectively refer to भृगु, वत्स and आग्रायण। शरद्वत् and शुनक are read in the बिदादि list, so these are to take अञ् in the sense of गोत्र; but this rule provides for फक् in the sense of भृगु and वत्स only. Thus शरद्वत्+फक् (आयन)=शारद्वतायन meaning भार्गव (son of भृगु), otherwise the form is शारद्वत (with बिदादि अञ्)। Similarly शौनकायन in the sense of son of वत्स; otherwise we get शौनक (with बिदादि अञ्); thus also दार्भायण with फक् in the sense of आग्रायण, otherwise the form is दार्भि (with इञ् by अत इञ् or बाह्वादेराकृतिगणत्वात्—बाह्वादिइञ्)।

मित—। शरद्वत्शुनकशब्दाभ्यां बिदादिगणे पाठात् आभ्याम् गोत्रे अञ् स्यात् ("बिदादिभ्यो ऽञ्" इति सूत्रात्); किन्तु अर्थविशेषे गोत्रे आभ्याम् अनेन सूत्रेण फगेव विधीयते न तु अञ, अत आह—"गोत्रे फक्…आद्यौ बिदादौ"। दर्भशब्दः शरद्वदादिवत् ऋषौ रूढ़ः। अस्मात् अदन्तत्वात् बाह्वादित्वात् वा इञ् प्राप्तः, स च अर्थविशेषे (आग्रायण-ऋष्यर्थे इत्यर्थः) अत्र निषिध्यते, फक् च विधीयते; अत आह —"अञ्इञोरपवादः"—आद्यशब्दद्वये अञ् बाध्यते, शेषे च इञ् बाध्यते इति सरलार्थः॥ अन्यत् सुगमम्।

११०५। द्रोणपर्वत-जीवन्तादन्यतरस्याम् ४।१।१०३॥

दी—। एभ्यो गोत्रे फक् वा। द्रौणायनः—द्रौणिः। पार्वतायनः—पार्वतिः। जैवन्तायनः—जैवन्तिः। अनादिरिह द्रोणः; अश्वत्थाम्न्यनन्तरे तूपचारात्।

The words द्रोण, पर्वत and जीवन्त (all designations of persons) optionally take the affix फक् in the sense of गोत्र (i. e, descendant grandson etc.); being अदन्त or these being बाह्वादि these

words are to take इञ् in the sense of अपत्य (here अपत्यसामान्य)। Thus we get द्रौणायन with फक् and द्रौणि with इञ् and so on. The word द्रोण here does not refer to the well-known first person (आदिपुरुष) of that name in Mahabharat, so our author says "अनादि: इह द्रोण:"। Hence also द्रौणायन cannot be applied to अश्वत्थामन् the son of आदि द्रोण। That द्रौणायन is applied to अश्वत्थामन् first Drona's immediate next son is by transference only (cp.—आध्यारोपेण तथाभिधानं भवति)।

मित—। अवसर्वे विकल्पोविहित:। द्रोणादिभ्य: फगभावे तु बाह्वादेराकृतिगणत्वात् एषाम् अदन्तत्वात वा इञ् स्यात्। अत: आह—"द्रौणायण:—द्रौणि:" इत्यादि। मर्वे द्रोणशब्दा: महाभारतस्य आदि-द्रोणस्य न वाचका:, भाष्ये तथा व्याख्यानात्, अत आह—"अनादि: इह द्रोण:" (यद्वा—अनादि: अप्रसिद्ध: अन्य: कश्चित् द्रोण इह गृह्यते इत्यर्थ:)। तस्य आदिद्रोणस्य अनन्तरे पुत्रे अश्वत्थाम्नि द्रौणायनादिप्रयोग: अयुक्त:, किन्तु अश्वथाम्नि अपि यत् "द्रौणायन:" प्रयुज्यते तत्, उपचारात् ज्ञेयम्, अत आह—"अश्वथाम्नि अनन्तरे तु उपचारात्"।

११०६। अनृष्यानन्तर्य्ये विदादिभ्योऽञ् ।४।१।१०४॥

दी—। एभ्योऽञ् गोत्रे, ये त्वत्रानृषय: पुत्रादयस्तेभ्य: आनन्तर्य्ये। सूत्रे स्वार्थे ष्यञ्। विदस्य गोत्रापत्यं वैद:। अनन्तरो वैदि:—बाह्वादेराकृतिगणत्वात् इञ्। पुत्रस्यापत्यं पौत्र:। दौहित्र:।

Words of the विदादि class take अञ् in the sense of गोत्र (grandson &c); but these words of the विदादि class which refer to non-sages i. e. to names of persons who are not sages e. g. पुत्र, दुहितृ &c. take अञ् in the sense of अनन्तरापत्य i.e. son. Thus the word आनन्तर्य्य in the sutra has sense of अनन्तर; In

other words अनन्तर takes स्वार्थे ष्यञ् (like words of the चतुर्वर्ण class) yielding आनन्तर्य्य। Thus विद+अञ् गोत्रापत्य=वैदः (here विद being the name of a sage) ; but विदस्य पुत्रः (अनन्तरः) = वैद+इञ् (बाह्वादि) = वैदि; though विद is not directly noted in the बाह्वादि list still it being आकृतिगण, we include विद in the above list. But पुत्रस्य अपत्यम् (son) = पुत्र+अञ् (अनन्तरार्थे) = पौत्रः। Similarly दौहित्र। पुत्र and दुहितृ being names of non-sages take अञ in the sense of अनन्तरापत्य (son only)।

मित—। न ऋषि इति अनृषि, लुप्तपञ्चमीकम् पदम्। तथा च मनोरमा "अनृषीति पञ्चम्या सौत्रो लुक्"। ततः अनृषिभ्यः इति तस्यार्थः जायते। एवम् सूत्रमिदं द्विधा विभज्यव्याख्यायते, प्रथमं यथा—"विदादिषु अनृषिभ्यः शब्देभ्यः आनन्तर्य्ये अञ्"; द्वितीयं तु—"विदादिषु ऋषिवाचकशब्देभ्यो गोत्रे एव अञ् स्यात्"। तथा हि—विदादिगणे ऋषयः अनृषयः च पठ्यन्ते। तत्र ये अनृषयः पुत्रादयः शब्दाः तेभ्यः अनन्तरापत्ये अञ् भवति ; अन्यत्र तु गोत्रे एव अञ् स्यात्। आनन्तर्य्ये इत्यस्य अनन्तरे अपत्ये इत्यर्थः। अनन्तरशब्दात् स्वार्थे ष्यञि आनन्तर्य्यमिति, चतुर्वर्णादिवत् स्वार्थे ष्यञ्; अत आह—"सूत्रे स्वार्थे ष्यञ्"। एवम् अनेन सूत्रेण विदशब्दात् गोत्रार्थे अञि सति वैदः लभ्यते। विदशब्दस्य ऋषिवाचकत्वात् गोत्रे अञ्, अस्मात् अनन्तरापत्यार्थे अञ् न भवति, किन्तु—बाह्वादेराकृति-गणत्वात्, बाह्वादि—इञि सति 'वैदिः' इति लभ्यते, तत आह—"विदस्य गोत्रापत्यं वैदः। अनन्तरो वैदि—बाह्वादेराकृतिगणत्वात् इञ्"। पुत्रशब्दस्य अनृषित्वात् आनन्तरापत्ये अञ्, ततः पौत्रः लभ्यते।

विदादिर्यथा—विद, उर्व, कश्यप कुशिक, भरद्वाज, उपमन्यु, किलात, किन्दर्भ, विश्वानर, ऋष्टिषेण, ऋतभाग, हर्यश्व; प्रियक, आपस्तम्ब, कूचवार, शरद्वत्, शुनक, धेनु, गोपवन, शग्रु, विन्दु, भाजक, भाजन, अश्वावतान, श्यामाक, शामक, श्यावलि, हरित, किन्दास, वह्यस्क, अर्क, लुष, वध्योग, विष्णुवृद्ध, प्रतिबोध रथीतर, रथन्तर, गविष्ठिर, निषाद, शवर, अलस, मठर, सूपाकृ, मृदु, पुनर्भू, पुत्र, दुहितृ, ननान्दृ, परस्त्री, परशु च॥

११०७। गर्गादिभ्यो यञ् ।४।१।१०५ ॥

टी—। ‘गोत्रे’ इत्येव । गार्ग्यः । वात्स्यः ।

In the sense of गोत्र (grandson &c), words of the गर्गादि class take the affix यञ् । Thus we get गर्ग + यञ = गार्ग् + यञ् (by "यस्येति च") = गार्ग्य (with आदिवृद्धि) । Similarly वात्स्य ।

N. B.—In रामो जामदग्न्यः and in पाराशर्यः व्यासः, जमदग्नि and पराशर take यञ् to denote son (अनन्तरापत्य) irregularly or by गोत्रत्वारोप : जमदग्नि and पराशर are read in this गर्गादि list—(see Balamanorama also).

मित—। सुगमा—। गर्गादिर्यथा—गर्ग, वत्स, वाजासे (‘असे’ असमासे ‘वाज’—शब्दः अत्र पठ्यते इत्यर्थः) संस्कृति, अज, व्याघ्रपात्, विदभृत्, प्राचीनयोग, अगस्ति, पुलस्ति, चमस, रेभ, अग्निवेश्य, शङ्ख, शठ, शक्र, एक, धूम, अवट, मनस्, धनञ्जय, वृक्ष, विश्वावसु, जरमाण, लोहित, संशित, बभ्रु, वल्गु, मण्डु, गण्डु, लिङ्गु, गुहलु, मनु, मङ्क्षु, अलिग, जिगीषु, तन्तु, मनायी, सूनु, कत्थक, कथक, ऋक्ष, तृक्ष, तनु, तरुक्ष, तलुक्ष, तण्ड, वतण्ड, कपि, कत, कुरुकत, अनडुह्, कण्व, शकल, गोकक्ष, अगस्त्य, कुण्डिनी, यज्ञवल्क, पर्णवल्क, अभयजात, विरोहित, वृषगण, रहूगण, शण्डिल, चणक, चुलुक, मुद्गल, मुसल, जमदग्नि, पराशर, जतुकर्ण, महित, मन्त्रित, अश्मरथ, शर्कराक्ष, पूतिमाष, स्थूर, अररका, एलका, पिङ्गल, कृष्ण, गोलन्द, उलूक, तितिक्ष, भिषज्, तड़ित, भडित, दल्भ, चेकित, चिकित्सित, देवहू, इन्द्रहू, एकलू, पिप्पलू, बृहदग्नि, सुलाभिन्, उक्थ, कुटीगु ॥ “मानवी प्रजा” इति तु अपत्यसामान्ये भविष्यति ।

१०१८ । यञञोश्च २।४।६४ ॥

टी—। गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेतयो र्लुक् स्यात् तत्कृते बहुत्वे, न तु स्त्रियाम् । गर्गाः, वत्साः, विदाः, ऊर्वाः । तत्कृते इति किम् ?—प्रियगार्ग्याः । स्त्रियां तु—गार्ग्यः

स्त्रियः। गोत्रे किम्? द्वैप्याः, औत्साः। प्रवराध्यायप्रसिद्धमिह गोत्रम्। तेनेह न—पौत्राः, दौहित्राः।

Words that end in यञ् and अञ् in the sense of गोत्र (descendant पौत्र), have their यञ् and अञ् elided, if plurality due to these affixes is denoted (तत्कृते बहुत्वे) but not in the feminine. Thus गर्गस्य गोत्रापत्यानि gives गर्ग+यञ्=गर्गाः (with यञ् elided for we have plural idea in the gotra-sense); similarly we get विदाः and ऊर्वाः [with elision of अञ् ("अनृष्यानन्तर्ये विदादिभ्योञ्") and there being plural idea as well]. Why do we say 'तत्कृते' in the vritti of this sutra? witness प्रियः गार्ग्यो येषाम्=प्रियगार्ग्याः (here यञ् does. not elide, for here बहुत्व i. e. plurality is not due to the affix यञ्, but the compond refers to others). This rule does not hold good in the feminine, so in feminine gender we have गर्गस्य अपत्यानि स्त्रियः=गर्ग+यञ्+ङीप =गार्ग्य+ङीप्=गार्गी (य् eliding by "हलस्तद्धितस्य")—which in fem. plural gives गार्ग्यः स्त्रियः। why do we say गोत्रे here? witness द्वैप्याः (द्वीपेभवा इति यञ् by "द्वीपादनुसमुद्रम्") and औत्साः (with भवार्थे अञ् by "उत्सादिभ्योऽञ्")—here यञ् and अञ् do not elide though pluralitv due to these very affixes is involved, for the sense of गोत्र is not at all denoted here. And by गोत्र here in this sutra we are to understand the गोत्र originated with the sages as enumerated in the chapter on प्रवर (प्रवराध्याय) in the Srauta sutras of Baudhayana &c. for this sutra is outside अपत्याधिकार (see ante also under sutra 1089)। Hence the अञ् in पौत्राः and दौहित्राः does not elide for though—here we have plural idea due to अञ् still the गोत्र of a sage is not at all connoted here.

[N. B.—Note that now—a—days गोत्र is usually 24 in number (vide धर्मप्रदीप &c.) ; and sutras say that प्रवर is that type of गोत्र which is promoted by seven original sages (cf. कश्यपोऽविर्भरद्वाजो विश्वामित्रोऽथ गौतमः । जमदग्निर्वशिष्ठश्च सप्तैते ऋषयः स्मृताः") i. e., it is ऋषिप्रवर्तित गोत्रविशेष ; and in अपत्याधिकार from the use of the general word गोत्र and not the technical word गोत्र we are to understand शास्त्रीय गोत्र (cf. अपत्याधिकारे गोत्रग्रहणादेव शास्त्रीयगोत्रं गृह्यते"—) ; so also पुत्रस्य पुत्रः gives पौत्र with बिदादि अञ् and this अञ् does not elide for 'issue' is meant here and not any शास्त्रीय गोत्रापत्य] ।

मित—। द्वितीयाध्यायस्य चतुर्थपादस्थमिदं सूत्रम्, न तु अपत्याधिकारस्थम् । अतः अत्र तदन्तग्रहणमस्ति । "यस्कादिभ्यो गोत्रे" इति सूत्रात् 'गोत्रे' इत्यनुवर्त्तते । 'तद्राजस्य बहुषु तेनैवास्त्रियाम्" इत्यस्मात् 'तद्राजस्य' इति वर्जयित्वा सर्वमनुवर्त्तते । 'लुक्' इति च "ण्यक्षत्रिय—"सूत्रात् लभ्यते । अत आह—गोत्रे यद् यञन्तम् अञन्तं च तदवयवयोः एतयोः (यञञोरित्यर्थः) लुक् स्यात् तत्कृते बहुत्वे (यञ्-अञ प्रत्ययकृतबहुत्वे), न तु स्त्रियाम् (स्त्रियां लुक् न स्यात् इत्यर्थः)" । एवं सति गर्गाः, वत्साः इति (गोत्रे यञन्ताः बहुत्वं द्योत्ये यञः लुका सिद्धाः) । एवं क्रमेण अञो लुका विदाः, ऊर्वाः इति स्थितम् ("अनृष्यानन्तर्ये विदादिभ्योऽञ्" इति अञो लुका सिद्धम्) । वृत्तौ 'तत्कृते' इति किमर्थमुक्तम् ? प्रियः गार्ग्यो येषाम् इति बहुव्रीहौ—'प्रियगार्ग्याः' इत्यत्र यञ्प्रत्ययगतबहुत्वाभावात् प्रत्ययस्य लुक् न स्यात् । स्त्रियाम् लुक् न स्यात्—अतः गार्गस्य अपत्यानि स्त्रियः इत्यत्र गर्ग + यञ् = गार्ग्य + ङीप् = गार्गी "हलस्तद्धितस्य" इति य्-लोपः, ततः बहुवचने 'गार्ग्यः' (यञ् प्रत्ययस्य तु लुक् न स्यात्) । 'गोत्रे' इति किमर्थमुक्तम् ? द्वीपे भवा इति द्वीप + यञ् ("द्वीपमनुसमुद्रम्" इति सूत्रेण) = द्वैप्याः, एवं औत्साः (उत्सादिभ्योऽञ्)—अत्र गोत्रप्रत्ययत्वाभावात् यञः अञश्च लुक् न स्यात् ॥ एतत् सूत्रम् अपत्याधिकारबहिर्भूतम् अतः अत्र बौधायनादिसूत्रकारपठितस्य प्रवराध्यायगतस्य गोत्रस्य एव

ग्रहणं स्यात्। "कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः। जमदग्निर्वशिष्ठश्च सप्तैते ऋषयः स्मृताः॥"—तेषां यदपत्यं तद्गोत्रमित्याचक्षते इति बौधायनादि—प्रवराध्यायप्रसिद्धाः भृग्वादय एव गोत्रत्वेन विवक्षिता इत्यर्थः। कैयटेन लौकिकस्य गोत्रस्य ग्रहणमिति भाष्यमुपादाय तथैव व्याख्यातत्वात् इति भावः। एवं पौत्राः दौहित्राः इत्यादौ पौत्रदौहित्रयोः तथाविधगोत्रवाचित्वाभावात् न लुक् इति वाच्यम्" (इति बालमनोरमा)।

११०८। मधुबभ्र्वोर्ब्राह्मणकौशिकयोः।४।१।१०६४

टी—। गोत्रे यञ्। माधव्यो ब्राह्मणः। माधवोऽन्यः। बाभ्रव्यः कौशिकर्षिः। बाभ्रवोऽन्यः। बभ्रुशब्दस्य गर्गादिपाठात् सिद्धेऽपि नियमार्थमिदम्। गर्गादिपाठफलं तु लौहितादि-कार्य्यम्। बाभ्रव्यायणी।

The words मधु and बभ्रु take the affix यञ् to denote गोत्र when meaning 'ब्राह्मण' and sage Kausika (कौशिक ऋषि) respectively; thus we get माधव्यः ब्राह्मणः (मधु + यञ = मधो + यञ् by "ओर्गुणः" = माधव्य with आदिवृद्धि and सन्धि); otherwise the form is माधवः with अण् &c. Similarly we get बाभ्रव्य in the sense of sage कौशिक otherwise बाभ्रवः। बभ्रु is read in the गर्गादि list, still special mention and formation with यञ् is to restrict it (नियमार्थ) in this special sense of 'sage'; and the aim to read it in the गर्गादि list is to attach compulsory ष्फ to the यञन्त word बभ्रु in the feminine by the rule "सर्वत्र लोहितादिकतन्तेभ्यः" (ante); and लोहितादि list is within the गर्गादि list i.e., the words beginning with लोहित in the गर्गादि list are लोहितादि। So Bhattoji says "गर्गादि पाठफलम् तु लोहितादिकार्य्यम्"। Thus we

get बभ्रु + यञ + ङीप् = वाभ्रव्य + ष्फ (आयन) + ङीप् = वाभ्रव्यायणी (षित्वात् ङीष्)।

मित—। मधुशब्दात् बभ्रुशब्दात् च गोत्रापत्ये यञ् स्यात् 'ब्राह्मणे', 'कौशिकऋष्यर्थे' च इत्यर्थः॥ बभ्रुशब्दस्य गर्गादि-पाठादेव गोत्रे यञि सिद्धेपि अत्र पठात् इदं नियम्यते यत्—यदि बभ्रुशब्दात् यञ् स्यात् गोत्रे, तदा कौषिकर्ष्यर्थे एव, नान्यतार्थे। एवं सति बभ्रुशब्दस्य गर्गादिपाठोऽयुक्तः स्यात् इत्याशङ्काह—बभ्रुशब्दस्य गर्गादिपाठफलं तु स्त्रियामस्मात् यञन्तात् "सर्वत्रलोहितादिकतन्तेभ्यः" इति ष्फ—प्रत्ययः यथा स्यात् तदर्थम्। ततश्च बाभ्रव्य + ष्फ = बाभ्रव्यायणी (षित्वात् ङीप्) सिध्यति।

११९०। कपिबोधादाङ्गिरसे ।४।१।१०७॥

गोत्रे यञ् स्यात्। काप्यः। बौध्यः। 'आङ्गिरसे' किम्। कापेयः। बौधिः।

The words कपि and बोध take यञ् in the sense of गोत्रापत्य if आङ्गिरस गोत्र is signified thereby. Thus काप्य and बौध्य are got with यञ् to denote आङ्गिरस गोत्र। Why do we say 'आंगिरसे' in the sutra? If आङ्गिरस गोत्र is not meant then in गोत्रापत्य the words will take ढक् and इञ् respectively by the rules "इतश्चानिञः" and "बाह्वादिभ्यश्च" &c.

मित—। कपिशब्दः बोधशब्दश्च गोत्रे यञ्प्रत्ययं लभते यदि तेन आङ्गिरस-गोत्रं गम्यते। अन्यथा, कपिशब्दात 'इतश्चानिञः' इति ढक्। बोध-शब्दात् "बाह्वादिभ्यश्च" इति इञ् स्यात्। कापेयः बौधिश्च सिध्यत्। अतः सूत्रे 'आङ्गिरसे' (आङ्गिरसात्मके गोत्रे इत्यर्थः) उच्यते। कपिशब्दात् गर्गादिपाठादेव यञि सिद्धे अत्र नियमार्थं पठ्यते। गर्गादिपाठफलम् तु लोहितादिकार्य्यम्; बोधशब्दात् अप्राप्ते विधिः।

१११। वतण्डाच्च। ४।१।१०८॥

टी—। 'आङ्गिरसे' इत्येव। वातण्ड्यः। अनाङ्गिरसे तु गर्गादौ शिवादौ च पाठाद् यञणौ—वातण्ड्यः, वातण्डः॥

The word वतण्ड also takes the affix यञ् to denote आङ्गिरस गोत्र। Thus we get वातण्ड्य with यञ्। When however आङ्गिरस गोत्र is not sginified then it will take both the यञ् and अण् for it is read in both the गर्गादि and शिवादि list. And in that case the forms are वातण्ड्य (with गर्गादि यञ्) and वातण्ड with (शिवादि—अण्)।

मित—। "वतण्डस्य गर्गादौ शिवादौ च पाठात् यञणोः प्राप्तयोराङ्गिरसे यञ् एव इति नियमार्थम् इति बालमनोरमा"।

११२। लुक् स्त्रियाम्। ४।१।१०९॥

टी—। वतण्डाच्चेति विहितस्य लुक् स्यात् स्त्रियाम्। शार्ङ्गरवादित्वात् ङीन्=वतण्डी। अनाङ्गिरसे तु वातण्ड्यायनी; लोहितादित्वात् ष्फः। अणि तु वातण्डी। ऋषित्वात् वक्ष्यमाणः ष्यङ् न—(११९८ सूत्रं द्रष्टव्यम्)।

The यञ् enjoined to वतण्ड by the prior rule, elides in the feminine gender. Then वतण्ड+यञ्+ङीन्=वतण्ड+ङीन् (with elision of यञ् by prior rule to denote आङ्गिरस गोत्र)=वतण्डी [with ङीन्, for the word वतण्ड is read in the शार्ङ्गरवादि list (see ante)]. But when it does not signify आङ्गिरस गोत्र, then it takes गर्गादि यञ् yielding वातण्ड्य—this in fem, takes ङीप् and compulsory ष्फ (आयन) by "सर्वत्र लोहितादिकतन्तेभ्यः" yielding the form वातण्ड्यायनी। The word वतण्ड is under लोहितादि list (included within the गर्गादि list as said before), so Bhattoji says

"लोहितादित्वात् ष्फः"। Again it takes शिवादि अण् to denote अनाङ्गिरस गोत्र, then (अकारान्त) वातण्ड with ङीप् by "टिड्ढा णञ्—" or with जातिलक्षण ङीष् gives वातण्डी in feminine. Again as it denotes some ऋषि (sage), so the rule "अणिञोः अनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे" (1198 infra) does not apply in its अकारान्त feminine form.

मित—। अनाङ्गिरसे गोत्रे वतण्डशब्दस्य गर्गादित्वात् यञ्। ततः लोहितादित्वात् स्त्रियां ङीपि सति "सर्वत्र लोहितादिकतन्तेभ्यः" इति नित्यः ष्फः स्यात्, ततः वातण्ड्यायनी इति, अत आह "अनाङ्गिरसेत वातण्ड्यायनी, लोहितादित्वात् ष्फः"। शिवादिपाठात् अणि सति स्त्रियां "टिड्ढा णञ्—" इति ङीपि, यद्वा गोत्रत्वेन जातिलक्षणे ङीषि सति वातण्डी इति। अस्य ऋषित्वात्, स्त्रियाम् "अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे" इति ष्यङ् न भवति।

१११३। अश्वादिभ्यः फञ्। ४।१।११०॥

टी—। गोत्रे। आश्वायनः॥ पुंसिजाते (गणसूत्रम्)। 'पुंसि' इति तु प्रकृतिविशेषणम्; जातस्य गोत्रापत्यं = जातायनः। पुंसि इति किम्? जाताया अपत्यं जातेयः।

Words of the अश्वादि list take फञ् (आयन) in the sense of गोत्रापत्य। Thus अश्व + फञ् = अश्व + आयन = आश्वायन (with आदिवृद्धि)। In the अश्वादि list we have the गणपाठ 'पुंसिजाते' where पुंसि qualifies the base 'जात': in other words the sense is—the word जात being in masculine gender is to be read in the अश्वादि list and then it takes फञ् (गोत्र) yielding जातायनः। The significance of पुंसि here is to say that the feminine of जात ie., जाता will not take अश्वादि फञ् in the sense of गोत्रापत्य, thus जाताया अपत्यं will yield जात + ढक् = जातेयः (by "द्व्यचः")। Hence Bhattoji says "पुंसि इति किम्?……जातेयः"।

मित—। गोत्रे अश्वादिभ्यः फञ् (आयन) स्यात्। अत्र गणे "पुंसि जाते" इति वर्त्तते, तत्र 'पुंसि' इति 'प्रकृतेः' जातशब्दस्य विशेषणम्, ततः एवमर्थो जायते- 'पुंसि' पुंलिङ्गे वर्त्तमानस्य जातशब्दस्य अश्वादिपाठात् फञ्, एवं सति जातायनः भवति। 'पुंसि' इति विशिष्य कथनात् स्त्रीलिङ्गजातशब्दस्य गोत्रापत्ये फञ् न स्यात् किन्तु "द्व्यचः" इति ढक् भवति, ततः 'जातेयः' इति लभ्यते।

अश्वादिगणो यथा—अश्व, अश्मन्, शङ्ख, शूद्रक, विद, पुट, रोहिण, खर्जूर, पिञ्जूल, भडिल, भण्डिल, भडित, भण्डित, प्रहृत, रामोद, ग्रीवकाश, काश, गोलाङ्क, अर्क, स्वन, वन, पाद, चक्र, कुल, पूल, श्रविष्टा, वीक्ष, पविन्द, पवित्र, गोमिन्, श्याम, धूम, धूम्र, वाग्मिन्, विश्वानर, कुट, शपार्तेयी, जन, जड, खड, ग्रीष्म, अर्ह, केत, विशय, विशाल, गिरि, चपल, चुप, दास, वैश्व, प्राच, आनडुह्य, पुंसि जाते, अर्जुन, सुमनस्, दुर्मनस्, मन, क्षान्त, आत्रेयभरद्वाजे, भरद्वाजात्रेये, उत्स, आतव, कितव, शिव, खदिर।

११११४। भर्गात्त्रैगर्त्ते ।४।१।१११॥

दी—। गोत्रे फञ्। भार्गायणः त्रैगर्त्तः। भार्गिरन्यः।

The affix फञ् (आयन) is attached to the word भर्ग, in the sense of गोत्रापत्य provided the refernce is to the son of the sage त्रिगर्त्त yielding the form भार्गायणः, otherwise we get भार्गि with इञ्।

मित—। "त्रिगर्त्तो नाम भर्गस्य पुत्रः। तस्यापत्यं त्रैगर्त्तः। ऋष्यण्। तस्मिन् गोत्रे भर्गात् फञ्"—(बालमनोरमा)॥

१११५। शिवादिभ्योऽण्। ४।१।११२॥

दी—। गोत्रे इति निवृत्तम्। शिवस्यापत्यं शैवः। गाङ्गः। पक्षे तिकादित्वात् फिञ्—गाङ्गायनिः। शुभ्रादित्वात् ढक् (? च) —गाङ्गेयः।

The अनुवृत्ति of "गोत्र" (in the sense of grandson &c.) ceases here (for Kasika and Kaiyata declare so). And the affixes henceforth are in the sense of अपत्य (सन्तति in general). Thus शिवस्य अपत्यं gives शिव + अण् = शैव ; similarly गङ्गा + अण् = गाङ्गः ।—The word गङ्गा being also read in the तिकादि list (see "तिकादिभ्यः फिञ्"—४।१।१५४) alternately (पक्षे) takes फिञ् (आयनि) also yielding गाङ्गायनि । गङ्गा being also included under the शुभ्रादि list which is taken by वृत्तिकार as आकृतिगण, it takes ढक् giving गाङ्गेय also (cf. "चकारोऽनुक्तसमुच्चयार्थ आकृतिगणतामस्य बोधयति—गाङ्गेयः पाण्डवेय इत्येवमादि सिद्धं भवति"—Kasika under "शुभ्रादिभ्यश्च").

[N. B.—Here we propose to add a "च" in Dikshit, otherwise emphasis of the last alternative is not well meant cf. "गंगाशब्दः पठ्यते तिकादिफिञा शुभ्रादि ढका च समावेशार्थम्"—Kasika under this rule].

मित—। अत्र सत्र "गोत्र" इति नानुवृत्तिरस्ति, अत आह—"गोत्रं इति निवृत्तम्"। शिवादिभ्यः अपत्ये एव अण्-प्रत्ययो भवति, न तु गोत्रे इति फलितम्। अत्र वृत्तिग्रन्थ एव गोत्रनिवृत्तपक्षे मानम्, यथा "गोत्रं इति निवृत्तम्। अतः प्रभृति सामान्येन प्रत्यया विज्ञायन्ते, शिवादिभ्योऽपत्ये अण् प्रत्ययो भवति" (इति काशिका)। गंगा शब्दस्य तिकादिपाठात् पक्षे "तिकादिभ्यः" इति फिञ्, पुनश्च शुभ्रादिपाठात् तस्य ढक् अपि स्यात् अपत्ये, अत आह—"पक्षे तिकादित्वात् फिञ्" इत्यादि।

शिवादिगणो यथा—शिव, प्रौष्ठि, प्रौष्ठिक, चण्ड, जम्भ, भूरि, दण्ड, कुठार, ककुभ, भम, अनभिम्लान, कोहित, सुख, सन्धि, मुनि, ककुत्स्थ, कहोड़, कोहड़, कहूयय, कहय, रोधक, पिञ्जल, खञ्जन, वतण्ड, तृण, कर्ण, क्षीर, ह्रद, जलह्रद, परिल, पिष्ट, हैहय, गोपिका, कपालिका, जटिलिका, बधिरिका. मञ्जिष्ठा वृष्णिक, खञ्जार, खञ्जाल, रेख, लेख, विख, आलेखन, विश्रवण, रवण, वर्त्तनाक्ष, ग्रीवाक्ष, पिटक, तृक्षाक, नभाक,

ऊर्णनाभ, जरत्कारु. पुरोहितिका, आर्य्यश्वेत, सुपिष्ट, मसुर, कर्ण, मयूरकर्ण, अदूरक, भचन्, ऋष्टिषेण, गङ्गा, विपाश, यस्क, लह्य, द्रुह्य, अयस्थूण, तूनकर्ण, पर्ण, भलन्दन, विरूपाक्ष, भूमि, इला, सपत्नी, द्व्यचो नद्याः त्रिवेणी, त्रिवणं च। इतिशिवादिः॥

१११६। अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः।४।१।११३

दी—। अवृद्धेभ्यो नदीमानुषीनामभ्योऽण् स्यात्। ढकोऽपवादः। यामुनः; नार्मदः। चिन्तिताया अपत्यं चैन्तितः। 'अवृद्धेभ्यः' किम्?—वासवदत्तेयः। नदीत्यादि किम्? वैनतेयः। तन्नामिकाभ्यः किम्? शोभनाया अपत्यं शोभनेयः।

Words denoting names of नदी and मानुषी take अण् in the sense of अपत्य, if the leading vowel in them is not a वृद्धि vowel i. e. आ, ऐ or औ। This rule bars the application of ढक् by the general maxim "स्त्रीभ्यो ढक्" (४।१।१२०), to be applied to words denoting females (स्त्री)। Thus यमुना+अण्=यामुनः (यमुना being name of a नदी), similarly नार्मदः (नर्मदा+अण्); so also चिन्तिता (name of a मानुषी)+अण्=चैन्तितः। Why do we say 'अवृद्धेभ्यः' in the rule? Witness वासवदत्तेयः with ढक्; वासवदत्ता being name of a मानुषी does not take अण् by the present rule, for here the word in a वृद्ध one i. e. the leading vowel here is आ—a वृद्धि। Why do we again say नदी &c. in the rule? witness वैनतेय with ढक्, for विनता is not the name of either a नदी or a मानुषी,but it is the name of Garuda's mother. Why again do we say 'तन्नामिकाभ्यः' here? witness शौभनेयः with ढक् here शोभना is an adjective word, it has no reference to नदी वा मानुषी।

मित—। ये अवृद्धाः शब्दा नदीं मानुषीं च बोधयन्ति, तन्नामवाचकशब्देभ्यः अपत्ये अण् भवति—इति सूत्रार्थः। अतः "अवृद्धेभ्यः नदीमानुषीनामभ्यः" इत्येव युक्तम् सूत्रांगम्। मन्ये स्पष्टबोधार्थम् एवमुक्तिः आचार्य्येण कृता। सूत्रमिदं "स्त्रीभ्यो ढक्" इति विहितं ढकं बाधिष्यते। यतः 'स्त्रीभ्यः ढक्' इति सामान्यो विधिः स्त्रीवाचकशब्दं प्रति। "अवृद्धाभ्यः—" इति स्त्रीवाचकशब्दं प्रति विशिष्य विहितात् सामान्यं बाधिष्यते, अत आह—"ढकोपवादः"। अस्मादेव वचनात् "द्व्यचः" इति वक्ष्यमाणं सूत्रमपि अतोपि स्त्रीशब्देषु विशेषविधानात्, अस्य बाधकं भवेत्, ततश्च दीक्षितचरणैः "द्व्यचः" इतिसूत्रव्याख्यावसरे "तन्नामिकाणोऽपवादः" इति उक्तम्॥ एवं नदीनामत्वात् यामुनः नार्मदः इति अनेन सूत्रेण अणा सिद्धम्। चिन्तिता नाम मानुषी, ततः अपत्ये अणा चैन्तितः इति। सूत्रे कथं 'अवृद्धाभ्यः' इति कथितम्? वासवदत्ता इत्यत्र वृद्धिस्वरसत्वात्, अस्य वृद्धशब्दत्वात्, अस्मात् अनेन सूत्रेण अण् न स्यात्। किन्तु "स्त्रीभ्यो ढक्" इति ढक् भवति, ततः वासवदत्तेय इति स्यात्। नदीत्यादि किम्? विनताशब्दः गरुड़मातरि कश्यपपत्न्यां रूढ़ः, अस्य नदीमानुषीनामत्वाभावात् अण् न स्यात् किन्तु अपत्ये ढगेव, ततश्च वैनतेय इति सिद्धं भवति। पुनश्च सूत्रे 'तन्नामिकाभ्यः' कथमुक्तम्। शोभनेयः इत्यत्र नदीमानुषीनामाबोधकत्वात् अपत्ये अण् यथा न स्यात् किन्तु ढक् एव, ततः 'तन्नामिकाभ्यः' इति कथितम्। 'शोभना' इति कस्याश्चित् विशेषणम्। तथा चोक्तं काशिकायाम् "तन्नामिकाभ्य इति सर्वनाम्ना प्रत्ययप्रकृतेः प्रत्यवमर्शः"।

११९७। ऋष्यन्धकवृष्णिकुरुभ्यश्च। ४।१।११४॥

दी—। ऋषयो मन्त्रद्रष्टारः। वासिष्ठः, वैश्वामित्रः। अन्धकेभ्यः—श्वाफल्कः। वृष्णिभ्यः—वासुदेवः, आनिरुद्धः। 'शौरिः' इति तु बाह्वादित्वात् इञ्। कुरुभ्यः—नाकुलः, साहदेवः। इञ एवायमपवादः, मध्येऽपवादन्यायात्। अत्रिशब्दात्तु परत्वात् ढक्—आत्रेयः।

Words denoting sages who are seers of Vedic mantras (मन्त्रद्रष्टा), words denoting names of Andhaka family, Vrishni family and Kuru family take अण् in the sense of अपत्य। This rule does not refer to names of families, but to designation of males there. Thus वशिष्ठ and विश्वामित्र who are vedic sages मन्त्रद्रष्टा ऋषि take अण् in the sense of अपत्य yeilding वाशिष्ठ and वैश्वामित्र। Similarly श्वफल्क gives श्वाफल्क with अण्, for it is name of one of अन्धकवंश। Similarly वसुदेव and अनिरुद्ध who are men of Vrishni race take अण् in the sense of अपत्य giving वासुदेव: (a name of कृष्ण) and आनिरुद्ध (son of अनिरुद्ध)। But शूर though a name of a person of वृष्णिवंश still in अपत्याधिकार it takes इञ् yielding शौरि, for शूर is included in the बाह्वादि list—see "बाह्वादिभ्यश्च" (ante). So also with अण् we get नाकुल: and साहदेव: for these refer to कुरुवंश—नकुल and सहदेव being included in the names of कुरु race. As regards अकारान्त words of males, the rule "अत इञ्" (४।१।९५) directs इञ् in the sense of अपत्य, but if अदन्त words are names of ऋषि, अन्धकवंश &c, then this rule directs अपत्ये अण्, so it is an अपवादसूत्र of the former "अत इञ" and this rule should not be an अपवाद of "इतश्चानिञ:", (४।१।१२२) which also is of males, for "इतश्चानिञ:" is latter in the order of अष्टाध्यायी,—though referance be to ऋषि, अन्धक &c. This is owing to the परिभाषा "मध्ये अपवादा: अनन्तरान् विधीन् बाधन्ते नोत्तरान्" i.e. An Apavada rule which is in the middle of two rules (as this present one) bars the former and not the latter. So Bhattoji says "इञ एवायमपवाद: मध्येऽपवादन्यायात्"। Hence अत्रि though the name of a well known Vedic seer, still in अपत्या-

विकार it takes ढक् by the latter rule "इतश्चानिञः" and not अण् by the present one. Thus अत्रि + ढक् [by the rule "इतश्चानिञः" (see infra)] = आत्रेयः। Thus here Bhattoji says "अत्रिशब्दात्तु परत्वात् ढक्"।

मित—। 'ऋषयः प्रसिद्धाः वसिष्ठादयः मन्त्रद्रष्टारः। अन्धकाः वृष्णयः कुरव इति वंशाख्या। ऋष्यादि कुर्वन्तेभ्यः प्रातिपदिकेभ्यः अपत्ये अण् प्रत्ययो भवति। सूत्रमिदम् पुंवाचकशब्दविषयम् नतु पूर्वसूत्रवत् स्त्रीविषयम्। वासिष्ठः, वैश्वामित्र इत्यादि उदाहरणानि पृथक् पृथक् मूले एव कथितानि। यद्यपि 'शूरः' इह वृष्णिवंशीयः कथित्, तथापि अस्य शब्दस्य बाह्वादेराकृतिगणत्वात् "बाह्वादिभ्यश्च" इति इञ् भवति, ततश्च शौरिरिति सिध्येत्; यद्वा "क्वचिदपवादविषयेऽपि उत्सर्गप्रवृत्तेः" शौरिः सिद्धः अत आह—"शौरिरिति तु बाह्वादित्वादिञ्"। अपत्ये "अत इञ्" इति सामान्यो विधिः पुंवाचकशब्देभ्यः, "ऋष्यन्धक—" इति तु विशेषविधिः अपवादभूतः "इतश्चानिञः" इति उत्तरविधिरपि सामान्यतः इकारान्तपुंवाचकसर्वशब्देभ्यो भवति। एवं सूत्रक्रमे स्थिते "ऋष्यन्धक—" इति सूत्रं कस्य सामान्यस्य वाधकं स्यात् पूर्वस्य परस्य वा, अथवा उभयस्य इति आकाङ्क्षायामाह—"इञ एवायमपवादः मध्येऽपवाद-न्यायात्"। "मध्ये अपवादाः अनन्तरान् विधीन् वाधन्ते न उत्तरान्" इति परिभा-षावलात् वर्त्तमानसूत्रम्,—'अत इञ्' इति विहितम् इञ्प्रत्ययं वाधते, न तु उत्तर सूत्रविहितम् 'इतश्चानिञः' इति ढक्प्रत्ययं वाधिष्यते। ततश्च अत्रिशब्दात् अनेन सूत्रेण अपत्ये ऋष्यण् न भवति, किन्तु परसूत्रेण ("इतश्चानिञः' इति सूत्रेण) ढक् एव स्यात्, आत्रेयश्च सिध्येत्, अतः भट्टोजिराह—"अत्रिशब्दात्तु परत्वात् ढक्—आत्रेयः"।

११९८। मातुरुत्संख्यासंभद्रपूर्वायाः। ४।१।११५॥

दी—। संख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यात् अण्-प्रत्ययश्च। द्वैमातुरः, षाण्मातुरः, साम्मातुरः, भाद्रमातुरः। आदेशार्थं वचनम्, प्रत्ययस्तूत्सर्गेण सिद्धः। स्त्रीलिङ्गनिर्देशोऽर्था-

पित्त्वः ; तेन धान्यमातुर्न । 'संख्या—' इति किम् ?—सौमात्रः । शुभ्रादित्वात् वैमात्रेयः ।

The base मातृ (meaning 'mother') preceded by numerals also सम् and भद्र, takes the angment उत् followed by the तद्धित affix अण्, in the sense of अपत्य । Thus द्वयोर्मात्रोरपत्यम्=द्विमातृ +अण् (तद्धितार्थ द्विगु by the rule "तद्धितार्थोत्तरपदसमाहारे च" i.e., द्विगु for the sake of a तद्धित affix=द्विमातृ उत्+अण्=द्वैमातुरः, ऋकारस्य उकारः, रपरत्वम् by "उरण् रपरः"), similarly षण्णां मातॄणामपत्यम् gives षाण्मातुर । सम्मतासाता=सम्माता, तस्याः अपत्यम् gives साम्मातुर (अण्, ऋकारस्य उकारः, रपरत्वम्), and भद्रा माता or भद्रा चासौ माता च gives भद्रमाता, तस्याः अपत्यम् yields भाद्रमातुर (as before). In the sense of अपत्य, the base मातृ will take अण् by the general rule "तस्यापत्यम्", still a special rule here for the base मातृ, is for the sake of attaching the augment उत् in connection with the affix अण्, so Bhattoji says 'आदेशार्थं वचनम्, प्रत्ययस्तु उत्सर्गेण सिद्धः' i.e., मातृ is mentioned here for its उदादेश and the अण् प्रत्यय is formed by the उत्सर्ग i.e., general rule. Remember that by mentioning 'संख्या सम्भद्रपूर्वायाः' in the feminine here, the Sutrakara means that we are to take the feminine base मातृ here meaning जननी ; in this sense मातृ being fem. संख्यासम्भद्रपूर्वायाः qualifying it, is also fem. ; hence to express this the author says "स्त्रीलिङ्गनिर्देशोऽर्थपित्त्वः" । But धान्यं माति इति धान्य+मा+तृच कर्त्तरि=धान्यमाता ; or मा+तृच=माता measurer ; धान्यस्य माता=धान्यमाता the measurer of paddy. Here the base मातृ means measurer and is mascu-

line as well, so in अपत्याधिकार it cannot take the aug. उत् by the present rule like the fem. base मातृ (meaning जननी)। Therefore Bhattoji says "तेन धान्यमातुः न" (i. e. उत्-आदेशः न स्यात्)। Why do we say संख्या—&c. in the sutra ?—Witness सौमात्रः (with अण् but without उदादेश, for here मातृ is not preceded by either संख्या वा सम् वा भद्र)। सुमातुः अपत्यम् will give सौमात्रः (with अण्)। Here the question arises that if मातृ takes अण् in अपत्याधिकार by the genaral rule "तस्यापत्यम्" why then do we get वैमात्रेयः in the sense विमातुः अपत्यं पुमान्, with the affix—ढक् (एय); Bhattoji answers this by saying that विमातृ takes ढक् (एय) in अपत्याधिकार, for it is read in the शुभ्रादि list; thus he says "शुभ्रादित्वात् वैमात्रेयः"।

मित—। संख्यापूर्वात् संपूर्वात् भद्रपूर्वाच्च मातृशब्दात् अण् प्रत्ययः स्यात् अपत्ये, उकारः च अन्त्यादेशः स्यात्—इति हि सूत्रार्थः। यथा—द्वयोर्मात्रोरपत्यं पुमान् इति "तद्धितार्थ—" इति समासे, द्विमातृ + अण् इति जाते, उकार अन्त्यादेशः ततः "उरण् रपरः" इति रपरत्वम्, एवं द्विमातुर् + अण् = द्वैमातुरः (तद्धिते आदिवृद्धिः); सम्मता माता, तस्या अपत्यम् = साम्मातुरः (अण्, उकारः, रपरत्वम्)। भद्रा माता, यद्वा—भद्रा चासौ माता चेति भद्रमाता, तस्यापत्यम् = भाद्रमातुरः (पूर्ववत् प्रक्रिया)। अपत्ये मातृशब्दात् "तस्यापत्यम्" इति सामान्यविधिनैव अण् प्रत्यये सिद्धे सति, 'उत्' इति अन्त्यादेशार्थं विशिष्यवचनम्, अत आह—"आदेशार्थं वचनम्, प्रत्ययस्तु उत्सर्गेण सिद्धः"॥ सूत्रे 'संख्यासंभद्रपूर्वायाः' इति स्त्रीलिङ्ग-निर्देशात् ज्ञायते यत् अत्रसूत्रे स्त्रीलिङ्गः जननीवाचकमातृशब्द एव गृह्यते, मातृशब्दस्य जननीगतस्त्रीत्वार्थं पुरस्कृत्य सूत्रे स्त्रीलिङ्गनिर्देशः ततश्च परिच्छेतृवाचकस्य पुंलिङ्गस्य (मा + तृच् कर्त्तरि = मातृ) मातृशब्दस्य अत्र ग्रहणं कथमपि न स्यात्; एवं धान्यस्य माता इति धान्यमाता, तस्य अपत्यम् इति धान्यमातृ + अण् = धान्यमात्रः, अत्र जननीवाचकमातृशब्दाभावात् उदादेशो न स्यात्, सर्वमेतदभिप्रेत्य भट्टोजिराह—

"स्त्रीलिङ्गनिर्देशः अर्थापेक्षः । तेन धान्यमातु (र्ग्रहणं) न (भवति)"। सूत्रे "संख्या—" इत्यादिविशिष्य कथनात्, सुमातुरपत्यम् इत्यत्र उदादेशेन—सौमात्रः च स्यात्। ननु मातृशब्दस्य अपत्ये—"तस्यापत्यम्" इति अण् स्यात् तत्कथं ढक् प्रत्ययेन वैमात्रेय (विमातुरपत्यम् इति) सिध्यति, अत्रोत्तरमाह "शुभ्रादित्वात् वैमात्रेयः"—विमातृशब्दस्य शुभ्रादिगणे पाठात् अपत्ये ढक्प्रत्ययो भवति ।

११११८ । कन्यायाः कनीन च ।४।१।११६ ॥

टी—। ढकोऽपवादोऽण् । तत्सन्नियोगेन कनीनादेशश्च । कानीनो व्यासः कर्णश्च—अनूढ़ाया एवापत्यमित्यर्थः ।

In अपत्याधिकार, the word कन्या takes अण् and then कनीन comes in place of it i. e. कनीन is ordered in place of कन्या, when अण् (अपत्यप्रत्यय) is added to it. This affix अण् bars ढक् that is to come after कन्या by the rule "स्त्रीभ्यो ढक्" । Thus कन्या + अण् (अपत्ये) = कनीन + अण् = कानीनः son of a maiden (virgin). Vyasa and Karna were sons of virgins i. e. they were कानीन i. e. sons of unmarried ladies.

मित—। "कनीन इति लुप्तप्रथमाकम्" (बालमनोरमा)। कन्यायाः अपत्ये अण्प्रत्ययः स्यात्, अण्-प्रत्यययोगे सति तत्स्थाने कनीनादेशश्च। सूत्रमिदम् "स्त्रीभ्यो ढक्" इति ढकं बाधित्वा अण्-प्रत्ययं विधत्ते, अत आह—"ढकः अपवादोऽण्" । भारते व्यासः कर्णश्च कन्यापुत्रौ इति विदितम्। कन्याशब्देन न अप्राप्तयौवना ग्रहीतव्या, किन्तु प्राप्तयौवना अलब्धविवाहा एव ग्रहीतव्या, अत आह "अनूढ़ाया एवापत्यम्" ।

११२० । विकर्ण-शुंग-च्छगलात् वत्सभरद्वाजात्रिषु । ४।१।११७ ॥

टी—। अपत्ये अण् । वैकर्णो वात्स्यः, वैकर्णिरन्यः ।

शौंगो भारद्वाजः, शौंगिरन्यः। छागलः आत्रेयः, छागलिरन्यः केचित्तु "शुंगा" इत्यावन्तं पठन्ति; तेषां ढक् प्रत्युदाहरणम् —शौंगेयः।

The words विकर्ण, शुङ्ग and छगल take the तद्धित affix अण् in the sense of अपत्य, if thereby these respectively refer to issues of वत्सवंश, भरद्वाजवंश and अत्रिवंश; otherwise by इञ् (अपत्ये) the forms are वैकर्णि, शौङ्गि and छागलि; some here read the word as शुङ्गा ending in आप्, in that case their प्रत्युदाहरण is शौंगेय (with ढक् by "स्त्रीभ्यो ढक्") and not शौंगि।

मित—। "वत्सादिशब्दैः तद्वंश्या विवक्षिताः। विकर्ण, शुंग, छगल—एभ्योऽण् स्यात्। वत्सवंश्ये भरद्वाजवंश्ये अत्रिवंश्ये चापत्ये इत्यर्थः। विकर्णादिभ्यो वत्सादिष्वेव 'ऋष्यण्' इति नियमार्थम् सूत्रम्"—बालमनोरमा।

११२१। पीलाया वा। ४।१।११८॥

टी—। तन्नामिकाण्' बाधित्वा "द्व्यचः" (सूत्र ११२४) इति ढकि प्राप्ते, पक्षे अण् विधीयते। पीलाया अपत्यं = पैलः—पैलेयः।

The word पीला (name of a मानुषी) takes अण् optionally in the sense of अपत्य। The word being female and name of a मानुषी, the अण् due here by the rule "अवृद्धाभ्यो नदीमानुषीभ्यः तन्नामिकाभ्यः", is barred by the latter rule (No 1124) "द्व्यचः" enjoining ढक् (for it has two vowels only). The persent rule however allows optional अण् along with ढक् by 'द्व्यचः', so Bhattoji says "तन्नामि-काण्'बाधित्वा 'द्व्यचः' इति ढकिप्राप्ते पक्षे अण् विधीयते"।

मित—। पीलाया अपत्ये अण् वा स्यात्। विकल्पेन अण् विधीयते। तदा

कथं अस्मात् अपत्ये उत्सर्गः इत्यतः आह—१११६ सूत्रविहितं तन्नामिकाणं बाधित्वा 'द्व्यचः' इति ढक् एव अपत्ये व औत्सर्गिको विधिः। सूत्रमिदं पाक्षिकं अण् प्रत्ययं शास्ति, तत आह—ढक्प्राप्ते पक्षे अण् विधीयते।

१११२। ढक् च मण्डूकात्। ४।१।११९॥

दी—। चादण्। पक्षे इञ्। माण्डूकेयः माण्डूकः, माण्डूकिः।

The word मण्डूक (name of a sage here) takes in अपत्य the affix ढक् as well as अण् and owing to अनुवृत्ति of "वा" here from the prior sutra these affixes are optional, so optionally the orginal affix इञ् also comes here yielding three froms as माण्डूकेयः (ढक्), माण्डूक (अण्) and माण्डूकि (इञ्)।

मित—। चकारात् अण्—प्रत्ययोऽत्र समुच्चीयते। तदाह—"चात् अण्"। पूर्वसूत्रात 'वा'—ग्रहणानुवृत्तेश्च पक्षे प्रकृतः इञप्रत्ययोऽपि अपनेत्र स्यात, तत आह—"पक्षे इञ्"। एवं ढका माण्डूकेयः, अणा माण्डूकः, इञा च माण्डूकिः लभ्यन्ते। मण्डूको नामात्र कश्चित ऋषिरेव गृह्यते।

११२३। स्त्रीभ्यो ढक्। ४।१।१२०॥

दी—। स्त्रीप्रत्ययान्तेभ्यो ढक् स्यात्। वैनतेयः। बाह्वादित्वात् सौमित्रिः। शिवादित्वात् सापत्नः।

Words ending in a feminine affix (आप् or ङीप् &c.) take ढक् प्रत्यय in अपत्याधिकार। Thus विनतायाः (गरुड़मातुः) अपत्यं पुमान् = विनता + ढक् = वैनतेयः। But सुमित्रा (fem.) being read in the बाह्वादि list, सुमित्राया अपत्यम् gives सौमित्रि with इञ्; and सपत्नी (fem.) being read in the शिवादि list, it takes अपत्ये अण् yielding सापत्नः।

मित—। ये शब्दा आप्ङीपादि-स्त्रीप्रत्यययुक्ता एव तेभ्यः अपत्ये ढक् प्रत्ययः

स्यात्। एवम् विनता + ढक् = वैनतेयः। सुमित्राशब्दः बाह्वादिषु पठ्यते, ततः अस्मात् अपत्ये इञ् स्यात्, सपत्नीशब्दस्य च शिवादिषु पाठात् अपत्ये अण् भवति ॥

१९२४। द्व्यचः ।४।१।१२१

दी—। द्व्यचः स्त्रीप्रत्ययान्तात् अपत्ये ढक्। तन्नामिकाणोऽपवादः—दात्तेयः। पार्थ इत्यत्र तु तस्येदमित्यण्।

Words having two vowels (अच्) only and ending in a feminine affix takes also ढक् (एय) in अपत्याधिकार। The significance of making this separate rule apart from the rule "स्त्रीभ्यो ढक्" is to bar the application of the rule "अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः"—is case of two-vowelled words though these refer to नदीनाम वा मानुषीनाम ; for this reason Bhattoji says "तन्नामिकाणोऽपवादः"। Thus दत्ता (name of a मानुषी) + ढक् अपत्ये = दात्तेयः। But पृथा + अण् = पार्थ—it is formed by the general rule "तस्येदम्" and not by any अपत्याधिकार rule.

मित—। "स्त्रीभ्यः" (i.e. स्त्रीप्रत्ययान्तेभ्यः) इति वर्त्तते ; द्वौ अचौ यस्य इति द्व्यच्, बहुव्रीहिः। तादृशात् स्त्रीप्रत्ययान्तात् अपि ढक् स्यात्। पूर्वसूत्रेणैव स्त्रीप्रत्ययान्तात् ढकि सिद्धे पुनर्योगकरणं, द्व्यचा नदीमानुषीनामतः अपि ढक् यथा स्यात् तदर्थम्, अतः भट्टोजिराह—"तन्नामिकाणोऽपवाद"। सर्वमेतत् अस्माभिः पूर्वम् "अवृद्धाभ्यो—"इति सूत्रव्याख्यानावसरे विशदीकृतम्। दत्ता नाम मानुषी, तस्याः अपत्यम् इति दत्ता + ढक् = दात्तेयः। पार्थ (पृथा + अण्) इति तु "तस्येदम्" इतिसूत्रेण अण्प्रत्ययेन सिद्धम्। दुर्घटवृत्तिस्तु—शिवादित्वात् अण्—इत्याह ; केचित् पृथाशब्दं उत्सादिषु च पठन्ति।

११२५। इतश्चानिञः। ४।१।१२२ ॥

दी—। इकारान्तात् द्व्यचोऽपत्ये ढक् स्यात्, न तु इञन्तात्। दौलेयः। नैधेयः।

Agains two—vowelled words ending in इकार (and not ending in feminine affix) take the तद्धित affix ढक् in the sense of अपत्य, but इञन्त words (as सौमित्रि &c) should not take ढक् in अपत्य। Thus दुलि + ढक् = दौलेय ; निधि + ढक् = नैधेयः।

[N. B.—As already said this rule bars ऋष्यण् being पर, so आत्रेय is got with ढक]।

मित— । अस्त्रीप्रत्ययार्थमिदं सूत्रम् । अन्यत् सुगमम् ॥ "ऋष्यन्धक वृष्णिकुरुभ्यश्च" इति व्याख्यापि अत्र द्रष्टव्या ।

११२६ । शुभ्रादिभ्यश्च ! ४।१।१२३ ॥

दी— । ढक् स्यात् (अपत्ये)। शुभ्रस्यापत्यं शौभ्रेयः ।

Words of the शुभ्रादि list will take ढक् in अपत्य (in supercassion of usual अपत्यप्रत्यय)। Thus शुभ्रस्यापत्यम् इति शुभ्र + ढक् = शौभ्रेयः। ("अस्त्रीत्वात् अप्राप्तौ अनेन सूत्रेण ढक्") ॥

मित—सुगमा । शुभ्रादिगणोयथा—शुभ्र, विष्ट, पुर, ब्रह्मकृत, शतद्वार, शलाथल, शलाकाभ्र, लेखाभ्र, विकास, रोहिणी, रुक्मिणी, धर्मिणी, दिश्, शाल्लुक, अजबस्ति, शकन्धि, विमातृ, विधवा, शुक, विश्, देवतर, शकुनि, शुक्र, उग्र, शवल, बन्धकी, सृकण्डु विश्र, अतिथि, गोदन्त, कुशाम्ब, मकष्टु, शान्ता, हर, यवष्टु, रिक, सुनामन्, लक्षणश्यामयोर्व्वसिष्ठे, गोधा, कृकलास, अणीव, प्रवाहण, भरत, भरम, वृकण्डु, कर्पूर, इतर, अन्यतर, आलीढ़, सुदक्ष, सुवक्षस्, सुदाकन्, कद्रु, तुदव, अशाय, कुमारिका, कुठारिका, किशोरिका, अम्बिका, जिह्माशिन्, परिधि, वायुदत्त, शकल, शलाका, खड्वर, कुवेरिका अशोका, गन्धपिङ्गला, खड़ोन्मत्ता, अनुदृष्टिन्, जरतिन्, बलीवर्दिन, विग्र, वीज, जीव, श्वन्, अश्मन्, अश्व । इति शुभ्रादिः । आकृतिगणोयम् । तथा च काशिका "चकारोनुक्तसमुच्चयार्थः, आकृतिगणतामस्य बोधयति—गाङ्गेय, पाण्डवेय इत्येवमादि सिद्ध भवति ॥

११२७। प्रवाहणस्य ढे। ७।३।२८॥

दी—। प्रवाहणशब्दस्य उत्तरपदस्य अचामादेरचोवृद्धिः पूर्वपदस्य तु वा ढे परे। प्रवाहणस्यापत्यं प्रावाहणेयः, प्रवाहणेयः।

This word प्रवाहण is read in the शुभ्रादि list and it will take ढक् अपत्ये। Now this present rule enjoins that of this whole word, the उत्तरपद i. e. वाहण will always get वृद्धि in its first vowel and the पूर्वपद i. e. प्र will take optionally वृद्धि when the affix ढ (अपत्यप्रत्यय) follows. Thus प्रवाहणस्यापत्यम् = प्रवाहण + ढक् = प्रावाहणेयः (with optional वृद्धि of प्र) and प्रवाहणेयः (without वृद्धि of प्र)।

मित—। प्रवाहणशब्दस्य शुभ्रादिपाठात् अपत्ये ढकिसति, शब्दस्यास्य आदिवृद्धिरेव प्राप्नोति। इदं तु सूत्रम्—प्रवाहणशब्दं द्विधा विभज्य, पूर्वपदस्य प्र-शब्दस्य विकल्पेन वृद्धिं शास्ति, उत्तरपदस्य 'वाहण'—इत्यस्य च नित्यमेव वृद्धिं विधत्ते। एवं प्रवाहण + ढक् (अपत्ये) = प्रावाहणेयः, तथा प्रवाहणेयः। "शुभ्रादित्वात् ढकि पूर्वपदस्य पाक्षिकी आदिवृद्धिः, उत्तरपदस्य नित्यम्। उत्तरपदे आकारस्य वृद्धेः फलन्तु प्रावाहणेयीभार्य्य इत्यत्र 'वृद्धिनिमित्तस्य च—' (८४० सूत्र) इति पुंवत्व प्रतिषेध एव"—(बालमनोरमा)॥

११२८। तत्प्रत्ययस्य च। ७।३।२९॥

दी—। ढ-प्रत्ययान्तस्य प्रवाहणस्योत्तरपदस्य आदेरचो वृद्धिः पूर्वपदस्य तु वा। प्रवाहणेयस्य अपत्यम् = प्रावाहणेयिः—प्रवाहणेयिः। वाह्यतद्धितनिमित्ता वृद्धिः ढाश्रयेण विकल्पेन वाधितुं न शक्यते इति सूत्रारम्भः।

Moreover this word प्रवाहण ending with the अपत्य affix ढक् i. e. now becoming प्रवाहणेय, will always get वृद्धि in the first vowel of its उत्तरपद (वाहणेय) and get optional वृद्धि in its पूर्वपद,

i. e. प्र। Thus प्रवाहणेयस्य अपत्यम् प्रावाहणेयि (will इञ् and वृद्धि of प्र), and प्रवाहणेयि (with इञ् and अवृद्धि of प्र)। Now if it be argued that the prior rule enjoins this very thing and what's the necessity of again beginning this rule, then the answer is— The compulsory आदि वृद्धि due to the affix इञ् (अपत्य) which is outside the ढ—प्रत्ययान्त word प्रवाहणेय and is other than ढ (ढ-प्रत्ययात् वाह्यः), cannot be superseded or overruled by the optional आदिवृद्धि in प्र when ढ follows, as enjoined by the former rule ; So this rule is newly made to enjoin optional— आदिवृद्धि of 'प्र' in प्रवाहणेय also when a further अपत्यप्रत्यय i.e., इञ् follows.

मित—। 'तत्प्रत्ययस्य' इत्यत्र तद्-शब्देन 'ढप्रत्ययो' परामृश्यते। तदन्तविधिना —"ढ-प्रत्ययान्तस्य" इत्यर्थः। "च"-कारात् पूर्वसूत्रम् अनुवर्त्तते, तदाह—'ढ-प्रत्ययान्तस्य प्रवाहणस्य उत्तरपदस्य—' इत्यादि। ततः प्रवाहणेयस्यापत्यम् इति ढक उत्तरं प्रावाहणेयिः—प्रवाहणेयिः इति च पदद्वयम् इञ्-प्रत्ययेन सिद्धं भवति॥ ननु पूर्वसूत्रेणैव पूर्वपदस्य वृद्धिविकल्पे सिद्धे किमर्थमिदमारभ्यते, इत्यत्रोत्तरमाह—पूर्वसूत्रं तु ढ-प्रत्यय-निमित्ते सति प्रवाहणशब्दस्य विकल्पं विधत्ते, इदं तु ढ-प्रत्ययान्तस्य प्रवाहणशब्दस्य ढ-प्रत्ययतो वाह्ये इञ् प्रत्यये निमित्तेपि तादृगेव विकल्पं ग्रास्ति ; नापि पूर्वसूत्रम् इञ्प्रत्यय- निमित्तम् आदिवृद्धिं वाधितुं शक्नोति, अतः सूत्रमिदं पृथक् आरभ्यते, अत आह—"वाह्यतद्धितनिमित्ता वृद्धिः (ढ-प्रत्ययतो वाह्यादिञ् प्रतायनिमित्ता वृद्धिरित्यर्थः), ढाश्रयेण विकल्पेन ("प्रवाहणस्य ढे" इति सूत्रविहितेन विकल्पेन) वाधितुं न शक्यते (न वाध्यते एव)"।

११२८। विकर्णकुषीतकात् काश्यपे। ४।१।१२४॥

दी—। अपतेय ढक्। वैकर्णेयः, कौषीतकेयः। अन्यो वैकर्णिः, कौषीतकिः।

The words विकर्ण and कुषीतक take the affix ढक् in अपत्याधिकार i. e, अपत्यार्थे,—only when these refer to काश्यप वंश। Otherwise the forms in अपत्य are वैकर्णि and कौषीतकि with इञ्।

मित—। सुगमा। "काश्यपे एव इति नियमार्थं शुभ्रादिभ्यः पृथक् पाठः"—(बालमनोरमा)॥

११३०। भ्रुवो वुक् च। ४।१।१२५॥

टी—। चाड् ढक्। भ्रौवेयः।

The word भ्रू takes the augment वुक् along with the affix ढक् following, in the sense of अपत्य। Thus भ्रू + वुक् + ढक् = भ्रू + वु (क-इत्) + ढक (एय) = भ्रू व् (उकारः उच्चारणार्थः and कित्वात् अन्त्यावयव, "आद्यन्तौटकितौ" इति) + एय = भ्रौवेयः।

मित—। भ्रू शब्दस्य अपत्य ढक-प्रत्ययोभवति, तत् सन्नियोगेन च वुगागमः। कित्त्वात् अन्त्यावयवः "आद्यन्तौ टकितौ" इति। ककार—इत्, उकारः उच्चारणार्थः। ततः भ्रू + व् ढक् (अपत्य) = भ्रौवेयः (आदिवृद्धिः)।

११३१। कल्याण्यादीनामिनङ्। ४।१।१२६॥

टी—। एषामिनङादेशः स्यात् ढक् च। काल्याणिनेयः। बान्धकिनेयः।

The words कल्याणी etc. take the augment इनङ् and the affix ढक् in अपत्याधिकार। Thus कल्याणी + इनङ् + ढक् (एय) = काल्याणिनेयः &c.

मित—। कल्याणी, सुभगा, बन्धकी प्रभृति कल्याण्यादीनाम् स्त्रीप्रत्ययान्तानाम् ढकि प्राप्ते अनेन इनङादेशोऽपि विधीयते। कल्याणी + इनङ् + ढक् (अपत्य) = काल्याणिनेय। कल्याण्यादिर्यथा—कल्याणी, सुभगा, बन्धकी, अनुदृष्टि, अनुसृति, जरती, बलि, बटी, ज्येष्ठा, कनिष्ठा, मध्यमा, परस्त्री इति॥

११३२। कुलटाया वा ॥ ४।१।१२७ ॥

टी—। इनङ्मात्रं विकल्प्यते। ढक् तु नित्यः पूर्वेणैव। कौलटिनेयः—कौलटेयः। सती भिक्षुक्यत्र कुलटा। या तु व्यभिचारार्थं कुलान्यटति तस्याः "क्षुद्राभ्यो वा" (सू ११३७) इति पक्षे ढ्रक्—कौलटेरः।

The word कुलटा optionally takes इनङ् when the affix ढक् follows. ढक् (अपत्य) being नित्य here by the rule "स्त्रीभ्यो ढक्", the augment इनङ is only made optional by the word "वा" in this sutra. Thus कौलटिनेयः (with इनङ) and कौलटेय (with ढक् but without इनङ)। Here कुलटा means a chaste female mendicant. But when it means one who gives up character and wanders from race to race, then this word कुलटा takes optionally ढ्रक by the following rule "क्षुद्राभ्यो वा" (1137) yielding the form कौलटेर (अपत्य) as well.

मित—। सूत्रे "वा" शब्देन यो विकल्पो विधीयते, स च इनङादेशस्यैव। यतः "स्त्रीभ्यो ढक्" इति सूत्रेण ढक् तु नित्यमेव स्यात्—अत आह "ढक् तु नित्यः पूर्वेण एव" (पूर्वगतेन "स्त्रीभ्यो ढक्" इति सूत्रेण इत्यर्थः)। अन्यत् सुगमम् ॥ कल्याण्यादिगणे 'सुभगा' पठ्यते। ततः सुभगा + ढक इति स्थिते आह—

११३३। हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ॥ ७।३।१९ ॥

टी—। हृदाद्यन्ते पूर्वोत्तरपदयोः अचामादेरचो वृद्धिर्ञिति णिति किति च। सुहृदोऽपत्यं सौहार्दः। सुभगाया अपत्यं सौभागिनेयः। सक्तु प्रधानाः सिन्धवः सक्तुसिन्धवः। तेषु भवः साक्तुसैन्धवः।

Words having हृद, भग and सिन्धु as final, takes वृद्धि of the first vowel of both their पूर्व and उत्तर पद, when ञ—इत्, ण—इत् or क्—इत् तद्धित affix follows. Thus सुहृत्+अपत्ये अण्=सौहार्दः [By the परिभाषा "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव", we should take the independent word हृद् here, cp—"स्वान्तं हृन्मानसं मनः" and not the लाक्षणिक words हृत् as got by "सुहृद्दुर्हृदौ मित्रामित्रयोः" or by "हृदयस्य हृल्लेखयदण्लासेषु" etc. Elsewhere Bhattoji following Vrittikara seems to get सौहार्द from सुहृदय+अण् (हृदय changing to हृत् by "हृदयस्य हृल्लेख—") but this is objectinable being against the above परिभाषा as also against the maxim "अर्थवद्ग्रहणे नानर्थकस्य"—[See our notes on सौहृद and सौहार्द in Sakuntalam—"Addendum"].

सुभगा+ढञ्=सुभगा+इनङ्+ढक्=सौभागिनेयः। कल्याण्यादित्वात् इनङ्। Similarly साक्तुसैन्धव with उभयपद वृद्धि। [By "च" in the sutra both पूर्वपद and उत्तरपद take the वृद्धि in their first vowels].

मित। "हृत्, भग—सिन्धु—एतदन्तेषु समासेषु इत्यर्थः" पूर्वपदस्य, तथा 'च'—कारात् उत्तरपदस्यापि वृद्धि र्विधीयते, तत आह—"हृदाद्यन्ते पूर्वोत्तरपदयोः अचामादेरचो वृद्धिः" इत्यादि। सुशोभनं हृत् इति सुहृत्, ततः अपत्ये अणि उभयपदवृद्धौ सौहार्दः। [अत्र सूत्रे "लक्षणप्रतिपदोक्त"—परिभाषया प्रतिपदस्य हृच्छब्दस्य एव ग्रहणं युक्तं न तु लाक्षणिकस्य ("सुहृद्दुर्हृदौ—" or "हृदयस्य हृल्लेख—" सूत्रगतस्य) हृत्-शब्दस्य]। सुभगा+अण्=कल्याण्यादित्वात् इनङ् =सौभागिनेयः (अनेनउभयपदवृद्धिः), एवं साक्तुसैन्धवः॥ कल्याण्यादिपठितस्य सुभगा-शब्दस्य अपत्ये—ढकि सति उभयपदवृद्धिविधानार्थमिदं सूत्रमत्रोपन्यस्तम् इति सर्वमवदातम्॥

११३४। चटकाया ऐरक् ।४।११२८॥

टी—। "चटकास्येति वाच्यम्" (वा—)। लिङ्गविशिष्टपरिभाषया स्त्रिया अपि। चटकस्य चटकाया वा अपत्यं चाटकैरः॥ "स्त्रियामपत्ये—लुग्वक्तव्यः" (वा—)। तयोरेव स्त्र्यपत्यं—चटका। अजादित्वाट्टाप्।

The affix ऐरक् comes after the word चटका in the sense of अपत्य। Though the sutra mentions चटका in the feminine still to remove doubt the varttikakara says that the word चटक—will take the affix ऐरक्—in अपत्यार्थ ; and by लिङ्गविशिष्ट परिभाषा (i-e., प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्) the word चटका also will take ऐरक्—in अपत्यार्थ। So चटका or चटक + ऐरक (अपत्य) gives चाटकैरः। But this affix elides to denote a female issue. Thus चटकायाः or चटकस्य अपत्यं स्त्री gives चटका with the elision of the affix ऐरक्।—The word चटका then takes टाप् (आ) in the feminine, because it is listed with words अज etc i.e. अजादि words; compare the sutra "अजाद्यतष्टाप्"।

मित—। सूत्रे स्त्रीलिङ्गग्रहणमतन्त्रम्, अत आह वार्त्तिककारः—"चटकस्येति वक्तव्यम्"। ततः लिङ्गविशिष्टपरिभाषया चटकाशब्दादपि अपत्ये ऐरक् प्रत्ययः स्यात्। कित्त्वात् तद्धिते अचामादेराचो वृद्धिः। चटका + ऐरक = चाटकैर। स्त्र्यपत्ये तु तस्य ऐरक्—प्रत्ययस्य लुक् स्यात्। ततः स्त्रीलिङ्गे अजादित्वात् टापि सति चटका इति॥

११७५। गोधाया ढ्रक्॥ ४।१।१२९॥

टी—। गौधेरः। शुभ्रादित्वात् पक्षे ढक्। गौधेयः।

The word गोधा takes the affix ढ्रक् in the sense of अपत्य। Thus गोधा + ढ्रक् = गोधा + एय् र = गोधा + एर (with elision of य by

"लोपो व्योर्वलि")=गौधेय (with यलोप and आदिवृद्धि)। The word being readin the शुभ्रादि list takes ढक् (एय) as well giving गौधेयः।

मित—। गौधेरः—"ढ्रक्प्रत्यये एयादेशे 'लोपो व्योः—' इति यलोपः, कित्त्वादादिवृद्धिरिति भावः"—(बालमनोरमा)।

११३६। आरगुदीचाम्॥ ४।१।१३०॥

दी—। गौधारः। रका सिद्धे आकारोच्चारणमन्यतो विधानार्थम्। जड़स्यापत्यं जाडारः। पण्डस्यापत्यं पाण्डारः॥

According to Professors in the North (northern part of India) the word गोधा takes the affix आरक् also (in अपत्यार्थे) yielding गौधार (कित्त्वात् आदि वृद्धिः)। Now this form गौधार may be got by the affix रक् only, then why do these professors say आरक् here? They say आरक् to affix it to other words as well. Thus with आरक् we get जाड़ार and पाण्डार in the sense of जड़स्यापत्यं and पण्डस्यापत्यम्।

मित—। उदीचाम् आचार्य्याणां मते गोधाशब्दस्य अपत्ये आरकप्रत्ययोपि स्यात्। गौधार इति। यद्यपि अत्र रका एव इष्टसिद्धिः स्यात्, तथापि अन्यान्यादन्तशब्देभ्यः विधानार्थम् 'आरक्' इति प्रत्ययोत्र उच्चारितः। एवं जाड़ारः, पाण्डारः इत्यादि सिध्यति। रग्-विधौ एवमादिषु आकारो न श्रूयेत।

११३७। क्षुद्राभ्यो वा। ४।१।१३१॥

दी—। अङ्गहीनाः शीलहीनाश्च क्षुद्राः; ताभ्यो वा ढ्रक्। पक्षे ढक्। काणेरः—काणेयः। दासेरः—दासेयः॥

Words signifying deformity in limbs and characterlessness in the females take optionally ढ्रक् in the अपत्याधिकार; optionally we get ढक as well. Thus काण्या अपत्यम्=काणी+ढ्रक=

काण्+एय र (with ईलोप by "यस्येति च")=काणेरः (with यलोप by "लोपो व्योर्वलि"); optionlly काणेयः with ढक् (एय), similarly we get दासी+ढ्रक=दासेरः and दासी+ढक=दासेयः।

मित—। "ढ्रक् अनुवर्त्तते, न आरक्" अत आह "वा ढ्रक्"। पक्षे तु ढक् स्यादेव। का क्षुद्राः इत्यपेक्षायामाह—"अङ्गहीना शीलहीनाश्च क्षुद्राः"। शीलहीनाः=सद्वृत्तिहीना धर्महीनाः वा। तथा च काशिका "क्षुद्रा अङ्गहीना धर्महीनाश्च"। "अनियतपुंस्का अङ्गहीना वा क्षुद्राः" इति भाष्यमपि अवमानम्। "अत्र अर्थधर्मेण तदाभिधायिन्यः स्त्रीलिङ्गाः प्रकृतयो निर्दिश्यन्ते"—अतश्च सूत्रे "क्षुद्राभ्यः" इति स्त्रीलिङ्गपरनिर्देशः॥

११३८। पितृष्वसुश्छण् ।४।१।१३२।

टी—अणोऽपवादः पैतृष्वस्रीयः।

The word पितृष्वसृ takes छण् in the sense of अपत्य। This rule bars अण् due after it.

मित—। मानुषीनामत्वात् 'पितृष्वसृ'—शब्दात् अपत्ये अणि प्राप्ते अनेन छण् प्रत्ययो विधीयते, अत आह "अणोपवादः"। पितृष्वसृ+छण्=पितृष्वसृ+ईय (छकारस्य ईयादेशः),—(ण—इत्त्वात् आदिवृद्धिः)=पैतृष्वस्रीयः।

११३९। ढकि लोपः ॥४।१।१३३॥

टी—। पितृष्वसुरन्त्यस्य लोपः स्यात् ढकि। अतएव ज्ञापकात् ढक्। पैतृष्वसेयः।

The base पितृष्वसृ has its final (ऋ) elided when ढक् follows after it (in अपत्य); from the making of this rule it is thus inferred that the word पितृष्वसृ will optionally take ढक् as well (अपत्य), yielding पितृष्वसृ+ढक्=पितृष्वस्+एय (अन्त्यलोप) =पैतृष्वसेय।

मित—! अपत्ये पितृष्वसृशब्दात ढकिसति अन्त्य—ऋकारस्य लोपः स्यात्। अस्मादेव सूत्रकारवचनात् पितृष्वसृशब्दात् अपत्ये ढगपि प्राप्तः ("शुभ्रादिभ्यश्चेति"?) इति फलितम्।

११४०। मातृष्वसुश्च ॥४।१।१३४॥

टी—। पितृष्वसुर्य्यदुक्तं तदस्यापि स्यात्। मातृष्वस्रीयः—मातृष्वसेयः।

All that are enjoined after the word पितृष्वसृ in the sense of अपत्य, are to be enjoined after the word मातृष्वसृ also. That is छण् and ढक् (with elision of अन्त्य—ऋकार) are due after मातृष्वसृ also (अपत्ये)। Thus we get मातृष्वस्रीयः (with छण्) and मातृष्वसेयः (with ढक् and अन्त्यलोप)।

मित—। पितृष्वसृशब्दात् यदुक्तम् अपत्ये तत् मातृष्वसृशब्दादपि भवति यथा—छण् प्रत्ययो, ढक् प्रत्यये सति अन्त्यलोपश्च इत्यर्थः।

११४१। चतुष्पाद्भ्यो ढञ् ।४।१।१३५॥

११४२। ढे लोपोऽकद्र्वाः ।४।१।१४७॥

टी—। कद्रुभिन्नस्य उवर्णान्तस्य भस्य लोपः स्यात् ढे परे। कामण्डलेयः। कमण्डलुशब्दः चतुष्पाज्जातिविशेषे।

Words denoting four-footed animal takes ढञ् in the sense of अपत्य। And a word ending in उवर्ण excepting कद्रु, and becoming a "भ" (see "यचिभम्" ante) at the same time, elides its final उ when the affix (or suffix) ढ follows. Thus कमन्डलु (which denotes a four-footed variety of creature)+ढञ् (एय)=कमन्डल्+एय (final उ eliding by this rule)=कामन्डलेयः (with वृद्धि)।

मित—। सुगमा। अत्र कमण्डलुशब्देन जलसेचनपात्रं न निर्दिश्यते, किन्तु काचित् चतुष्पाज्जातिरेव लक्ष्यते, ततश्च "चतुष्पाद्भ्यो ढञ्" इति सूत्रमत्र प्रवर्त्तते।

११४३। गृष्ट्यादिभ्यश्च ४।१।१३६॥

दी—। एभ्यो ढञ् स्यात्। अण्—ढकोरपवादः। गार्ष्टेयः। मित्रयोरपत्यम्, ऋषत्रणि प्राप्ते ढञ्—

Words of गृष्टि—class take ढञ् in the sense of अपत्य। Now words of the गृष्टि class read अगस्ति and मित्रयु which are names of sages, so अण् by the rule "ऋष्यन्धक—"is due after these (in अपत्य) and ढक् to other words of this class by 'इतश्चानिञः' was due; but this rule bars both these अण् and ढक्, to words i.e. all words mentioned in this class. Thus गृष्टि + ढञ् = गार्ष्टेयः। Then in मित्रयु + ढञ् (in place of ऋषिवाचक अण्), we look forword for its special formation—

मित—। "गृष्टि, हृष्टि, हलि, वलि, कुठि, अजवस्ति, अगस्ति, मित्रयु—एते गृष्ट्यादयः। अत्र अन्त्ययोः ऋषित्वादण् प्राप्तः, अन्येभ्यस्तु 'इतश्चानिञः' इति ढक् प्राप्तः" (बालमनोरमा)। ढञ् तु उभयोरप्यनयोः प्रतिषेधः, अत आह—"अण् ढकोरपवादः"। इदमप्यत्र स्मर्त्तव्यम्—"सकृत्प्रसूता मनुष्यादिरपि गृष्टिः, न तु गौरेव, ततश्च" अतुष्पाद्भ्यः इत्यनेन न प्राप्तः"—(बालमनोरमा)॥

११४४। केकयमित्रयुप्रलयानां यादेरियः ॥७।३।२॥

दी—। एषां यकारादेरिय् आदेशः स्यात् ञिति णिति किति च तद्धिते परे। इति इयादेशे प्राप्ते—

These words (i.e. केकय, मित्रयु and प्रलय) take इय before their यकार when a तद्धित affix dropping ञ्, ण or क follows. Thus केकय + अञ् (अपत्ये) = कैकेयी (with इयादेश); प्रलय + अण् (तत आगत

इत्यर्थे) = प्रान्तेयः and मित्रयु + ढञ् = मित्रइय् + ढञ्—this being the case now we further look ahead—

मित—। सुगमा ॥ "मित्रयोरपत्यं—ढञि, एयादेशे मित्रयु + एयइति स्थिते 'ओर्गुण' बाधित्वा अनेन इयादेशे सति 'आद्गुणे' मैत्रेयेय इति 'प्राप्ते सति" (बालमनोरमा)—आह—

११४५। दाण्डिनायन-हास्तिनायन-आथर्वणिक-जैह्माशिनेय-वासिनायनि—भ्रौणहत्य—धैवत्य—सारव—ऐक्ष्वाक—मैत्रेय—हिरण्मयानि ।६।४।१७४ ॥

दी—। एतानि निपात्यन्ते । इति—युलोपः—मैत्रेयः । मैत्रेयौ ।

These words are irregularly formed. Thus 'यु' of मित्रयु does not take इय before it by the preceding rule, but यु altogether elides by this rule and then we get मित्र + ढञ् (एय) = मैत्रेयः (whose fem. is मैत्रेयी)। Its dual is मैत्रेयौ and for its plural we look forward—

मित—। अत्र काशिकावृत्तिर्यथा—"दण्डिन् हस्तिन् इत्येतौ नडादिषु पठ्यते। तयोरायने परतः प्रकृतिभावो निपात्यते। केषाञ्चित 'हस्तिन्' इति नडादिषु न पठ्यते। तेषामतएव निपातनात् फगपि भवति। दण्डिनोपत्यं दाण्डिनायनः। हस्तिनोपत्यं हास्तिनायनः। अथर्वन् इति वसन्तादिषु पठ्यते, अथर्वणा प्रोक्तो ग्रन्थोपि उपचारात् अथर्वन्नित्युच्यते। तमधीते यः स आथर्वणिकः, इकि प्रकृतिभावो निपात्यते। जिह्माशिन्निति शुभ्रादिषु पठ्यते। तस्य ढे परतः प्रकृतिभावो निपात्यते। जिह्माशिनोपत्यं जैह्माशिनेयः। वासिनोपत्यम्—'उदीचां वृद्धात्—'इति फिञ्। तत्र प्रकृतिभावो निपात्यते—वासिनायनिः। [अत्र 'वाशिनायनि' इत्यपि पाठो दृश्यते]। भ्रूणहन् धीवन् इत्येतयोः ष्यञि तपरः तकारादेशो निपात्यते। भ्रूणघ्नो भावः = भ्रौणहत्यम् ; धीवन्नो भावो धैवत्यम्। 'हनस्तोचिण्णलोः' इति यत्तत्वं तत् धातुप्रत्यये

एव इति भौणघ्नो वार्त्त्घ्न इत्यत्र न भवत्यतो 'भौणहत्य' तत्त्वं निपात्यते। सारव इति सरयू इत्येतस्य अणि परे यादेशो निपात्यते। सरय्वां भवं=सारवमुदकम्। ऐक्ष्वाक इति स्वरसर्वनाम्ना एकश्रुत्या पठ्यते। ततः अयमाद्युदात्तः अन्तोदात्तश्च निपात्यते। इक्ष्वाकोरपत्यं 'जनपदशब्दात् क्षत्रियादञ्' इत्यञ्, तत्र उकारलोपो निपात्यते—ऐक्ष्वाकः। वा—इक्ष्वाकुषु जनपदेषु भवः 'कोपधाद्‌ण्' इत्यण् + उकारलोपश्च॥ मैत्रेय इति मित्रयुशब्दो गृष्ट्यादिषु पठ्यते, ततः ढञि कृते पूर्वसूत्रेण यादेरियादेशापवादो युशब्दलोपो निपात्यते। मित्रयोरपत्यं=मैत्रेयः" ।…"हिरण्यस्य विकारार्थे मयटि णकारात् यकाराकारयोर्लोपः"। हिरण्यस्य विकार इति हिरण्मयः, तथाच भट्टिः "हिरण्मयी साललतेव जङ्गमा"॥ मैत्रेय—शब्दस्य बहुवचने रूपं दर्शयितुं सूत्रमुपन्यस्यति—

११४६। यस्कादिभ्यो गोत्रे।२।४।६३॥

टी—। एभ्योऽपत्यप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम्। मित्रयवः।

The अपत्यप्रत्यय (having ref. to some गोत्र) is elided after words of the यस्क class, if plurality due to अपत्यप्रत्यय is signified but not in the feminine. Thus we get मित्रयवः in the plural of मित्रयु replacing the base मैत्रेय (with the elision of अपत्यप्रत्यय ढञ्, for बहुत्व due to अपत्यप्रत्यय is meant here).

मित—। "नेदं सूत्रमपत्याधिकारस्थम्, किन्तु अष्टाध्याय्याः द्वितीयाध्यायगतमेव। अतोऽत्र गोत्रशब्देन प्रवराध्यायप्रसिद्धमेव गोत्रं गृह्यते इति प्रागुक्तम्, अत आह "एभ्यः अपत्यप्रत्ययस्य लुक् स्यात्" इत्यादि॥ यस्कादिगणो यथा—यस्क, लुह्य, द्रुह्य, अयःस्थूण, तृणकर्ण, सदामत्त, कम्बल, हार, बहिर्योग, कर्णाटक, पर्णाढक, पिण्डीजङ्घ, बकसक्थ, विश्रि, अजवस्ति, कुद्रि, मित्रयु, रक्षोमुख, जङ्घारथ, उत्कास, कटुक, मन्थक, पुष्करसद्, विषपुट, उपरिमेखल, क्रोष्टुमान, क्रोष्टुपाद, क्रोष्टुमाय, शीर्षमाय, खर्पर, पदक, वर्षुक, भलन्दन, भडिल, भण्डिल, भड़ित, भण्डित।

११४३ ॥ अत्रि-भृगुकुत्स-वशिष्ठगोतमाङ्गिरोभ्यश्च ।२।४।६५

दी—। एभ्यो गोत्रप्रत्ययस्य लुक् स्यात् तत्कृते वहुत्वे न तु स्त्रियाम्। अत्रयः, भृगवः, कुत्साः, वशिष्ठाः, गोतमाः, अंगिरसः।

The गोत्रप्रत्यय i.e. गोत्रापत्यप्रत्यय after the words अत्रि, भृगु, कुत्स, वशिष्ठ, गोतम and अङ्गिरस् elides when plurality due to गोत्रप्रत्यय is denoted but not in the fem. Thus we get अत्रयः etc. with elision of अपत्यप्रत्यय i.e. ढक् etc. here

मित—। 'गोत्रे' इति 'वहुषु तेनैवास्त्रियाम्' इति च अनुवृत्तिसत्वात् आह— एभ्यो गोत्रप्रत्ययस्य लुक् स्यात् इत्यादि। अत्रिशब्दात् "इतश्चानिञः" इति अपत्ये ढक् प्रकृतः, तस्य अनेन लुक्। इतरेभ्यस्तु ऋष्यणो लुक् वहुषु। लुकि सति आदिवृद्धिनिवृत्तिः इति वालमनोरमा।

११४८। वह्वच इञः प्राच्यभरतेषु ॥२।४।६६॥

दी—। वह्वचः परो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्त्तमानस्तस्य लुक् स्यात्। पन्नागाराः। युधिष्ठिराः।

The affix इञ् (अपत्यप्रत्यय) coming after a word having many vowels (वहु अच्) elides in the plural if the word denotes either a प्राच्यगोत्र or a भरत गोत्र (descendant of Bharata). Thus पन्नागारस्य अपत्यानि इति पन्नागाराः (with elision of इञ् in the वहुवचन due to अपत्यप्रत्यय) [and this word denotes a प्राच्यगोत्र]। युधिष्ठिरस्य अपत्यानि इति युधिष्ठिर+इञ् (वाह्वादि इञ् in supercession of अण् etc. and so on)=युधिष्ठिराः (with elision of इञ् in the plural for the word denotes one of भरतगोत्र)। In एकवचन the froms are—पान्नागारिः and यौधिष्ठिरिः।

मित—। सुगमा—॥

११४९ । न गोपवनादिभ्यः ॥२।४।६७॥

दी—। एभ्यो गोत्रप्रत्ययस्य लुक् न स्यात् । विदाद्यन्तर्गणोयम् । गौपवनाः । शैग्रवाः ।

The गोत्रप्रत्यय after words of the गोपवन class does not elide if बहुत्व due to अपत्यप्रत्यय is denoted. Words गोपवन etc are to be found within the विदादि list (which see ante); thus we get गोपवनाः etc in the plural.

मित—। गोपवनादिभ्यः विदादित्वात् अञि सति "यञञोश्च" इति अपत्यकृतबहुत्वे लुकि प्राप्ते आह—एभ्यः गोत्रप्रत्ययस्य लुक् न स्यात् ।

११५० । तिककितवादिभ्यो द्वन्द्वे ॥२।४।६८ ॥

दी—। एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुक् स्यात् द्वन्द्वे । तैकायनश्च कैतवायनश्च—"तिकादिभ्यः फिञ्" (सूत्र ११७८), तस्य लुक् । तिककितवाः ।

In a द्वन्द्व compound of words—तिक, कितव etc (i.e. of words of this class as will be found here) the गोत्रप्रत्यय will elide if बहुत्व due to the प्रत्यय is conveyed. Thus तैकायनश्च कैतवायनश्च will give with elision of फिञ् by this rule = तिककितवाः । The फिञ् (आयन) after both the words elide, for we have सप्तमी in the word द्वन्द्वे (including both or all members of the द्वन्द्व compound).

मित—। सूत्रे 'द्वन्द्वे' इति सप्तमीनिर्देशात् इदं ज्ञायते—यत् द्वन्द्वे घटिष्यमाणात् सकलशब्दादेव फिञः लुक् स्यात् । अत आह—तैकायनश्च कैतवायनश्च इति तिककितवाः ; गणो यथा—तिककितवाः वङ्गरभण्डीरथाः, उपकलमकाः, पफकनरकाः, बकनखगुदपरिणद्धाः, उब्जककुभाः, लङ्कशान्तमुखाः, उत्तरशलङ्कटाः, कृष्णाजिनकृष्णसुन्दराः, अग्निवेशदशेरकाः ।

११५१। उपकादिभ्योऽन्यतरस्यामद्वन्द्वे । २।४।२८ ॥

टी— एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुग्वा स्यात् द्वन्द्वे च अद्वन्द्वे च। औपकायनाश्च लामकायनाश्च—"नड़ादिभ्यः फक्" —तस्य लुक् = उपकलमकाः, औपकायनलामकायनाः। भ्राष्टककपिष्टलाः—भ्राष्ट्रकिकापिष्टलयः। उपकाः – औपकायनाः। लमकाः – लामकायनाः।

The गोत्रप्रत्यय after words of the उपकादि class optionally elides in बहुवचन, whether they enter or does not enter in a द्वन्द्व compound, Thus in द्वन्द्व compound and denoting plurality due to गोत्रप्रत्यय, we have optionally उपकलमकाः (with प्रत्ययलोप) and औपकायनलामकायनाः (without elision of गोत्रप्रत्यय i.e., फक् dueby the rule "नड़ादिभ्यः फक्")। In भ्राष्ट्रकिकापिष्टलयः we have अपत्ये इञ् and so there is optional elision of the प्रत्यय in बहुवचन and in द्वन्द्व। These words are also read in the उपकादि class—hence this rule applies. Without द्वन्द्व we get उपकाः—औपकायनाः etc. (with optional elision of फक् etc in the बहुवचन)।

मित—। चकारानुवर्त्तनात् आह—द्वन्द्वे च अद्वन्द्वे च। एवं द्वन्द्वे वैकल्पिकलुकि सति—उपकलमकाः—औपकायनलामकायनाः। भ्राष्ट्रकिकापियष्ठलः इत्यत्र इञो वा लुक् स्यात्। अद्वन्द्वे उदाहरणं यथा—लमकाः लामकायनाः। उपकाः—औपकायनाः—इत्यादि। नड़ादिफक् बोध्यः॥ उपकादिर्यथा—उपक, लमक, भ्राष्ट्रक, कपिष्ठल, कृष्णाजिन, कृष्णसुन्दर, चुडारक, आड़ारक, गडुक उदङ्क, सुधायुक, अवन्धक, पिङ्गलक, पिष्ट, सुपिष्ट, मयूरकर्ण, खरीजङ्घ, शलाथल, पतञ्जल, पदञ्जल, कण्ठेरणि, कुषीतक, काशकृत्स्न, निदाघ, कलशीकण्ठ, दामकण्ठ, कृष्णपिङ्गल, कर्णक, पर्णक, जटिरक, बधिरक, जन्तुक, अनुलोम, अनुपद

प्रतिलोम, अपजग्ध, प्रतान, अनभिहित, कमक, वटारक, लेखाभ्र, कमन्दक, पिञ्जूलक वर्णक, मसूरकर्ण, मदाघ, कवन्तक, कमन्तक, कदामन्त, दामकण्ठ ॥

१९५२। आगस्त्य कौण्डिन्ययोरगस्तिकुण्डिनच् ॥२।४।७०॥

दी—। एतयोरवयवस्य गोत्रप्रत्ययस्य अणो यञश्च बहुषु लुक् स्यात्, अवशिष्टस्य प्रकृतिभागस्य यथासङ्ख्यम्—"अगस्ति", "कुण्डिनच्"—एतौ आदेशौ स्तः। अगस्तयः—कुण्डिनाः।

The गोत्रप्रत्ययः (i.e., गोत्रापत्यप्रत्यय) अण् and यञ् which respecively form part of the words आगस्त्य (i.e. अगस्त्य (ऋषि) + अण् = आगस्त्य) and कौण्डिन्य (i.e. कुण्डिन + यञ् (गर्गादि) = कौण्डिन्य) elide in the बहुवचन, and then in place of the rest portion of these bases we in order get the आदेशs—अगस्ति and कुण्डिन i.e., after elision of अण् of आगस्त्य and of यञ् of कौण्डिन्य, these bases are gradually replaced by अगस्ति and कुण्डिन respectively. Hence finally we get अगस्तयः and कुण्डिनाः in the plural.

मित—। "आगस्त्य शब्दात् ऋष्यणोलुक्। प्रकृतेः अगस्ति—आदेशः कौण्डिन्यशब्दः गर्गादियञन्तः—बहुत्वे यञो लुक्, प्रकृते कुण्डिनादेशश्च" —(बालमनोरमा)।

११५३ ॥ राजश्वशुराद्यत् ॥४।१।१३७॥

दी—। "राज्ञो जातावेवेति वाच्यम्" (वार्त्तिक)।

११५४ ॥ ये चाभावकर्मणोः ॥६।४।१६८॥

दी—। यादौ तद्धिते परे अन् प्रकृत्या स्यात्, न तु भावकर्मणोः। राजन्यः। श्वशुर्यः। जातिग्रहणात् शूद्रादौ उत्पन्नो—राजनः।

The bases राजन् and श्वशुर take the तद्धित affix यत् in the sense of अपत्य, and then the varttika restricts that राजन् takes यत् in the sense of जाति (i.e. kingly class) only. Now the next rule says that a base ending in अन् remains unchanged when a तद्धित beginning with य follows but not in the sense of भाव or कर्मन्। Thus राजन्+यत्=राजन्य (the अन्नन्त base राजन् remaining unchanged, for यादिप्रत्यय i.e. यत् follows here). Similarly श्वशुर+यत्=श्वशुर्य। As the sutra enjoins यत् after राजन् in the sense of जाति, so one born of a क्षत्रिय king but in a शूद्रा or any one else, then with अण् we get राजन्+अण्=राजनः। But in राजन्+अण्, the rule "नस्तद्धिते" (i.e. नान्तस्य भस्य टेः लोपः स्यात् तद्धिते) is to enjoin टि-लोप in राजन् and we look forward—

मित—। राजन्शब्दात् श्वशुरशब्दात् च अपत्ये यत्—प्रत्ययो विधीयते। ततः वार्त्तिककारः राजन्शब्दात् जातावेव यत्प्रत्ययं विशिनष्टि—"राज्ञो जातावेव" इति। प्रकृते राजन्+यत् इति स्थिते आह—"यादौ तद्धिते परे अन् प्रकृत्या स्यात्" इत्यादि। एवम् राजन्य, श्वशुर्य इति। भावकर्मणोस्तु—राजन्+यक्=राज्यम् (अत्र अन् प्रकृत्या न स्यात् भावकर्मणोरेव यक् प्रत्ययस्य विहितत्वात्)। अत्र वार्त्तिकवलेन 'जातिग्रहणात्'—राज्ञः शूद्रादौ य उत्पन्न स राजनः एव। राजन्+अण् इत्यत्र "नस्तद्धिते" इति टिल्लोपे प्राप्ते आह—

११५५। अन् ॥६।४।१६७॥

दी—। अणि अन् प्रकृत्या स्यात् इति टिल्लोपो न। 'अभावकर्मणः" किम्? राज्ञः कर्म भावो वा राज्यम्।

The अन्नन्त base remains unchanged i.e. its टि—portion ("अचोऽन्त्यादि टिः") does not elide when the affix अण् follows. Thus in राजन्+अण् there is no टिलोप by "नस्तद्धिते" and we get

राजन: with प्रकृतिभाव by this rule ; why do we say भावकर्मणो: in the sutra ? Witness राज्यम् with यक् (by "पत्यन्त पुरोहितादिभ्यो यक्")—here there is no प्रकृतिभाव for य comes in the sense of भाव and कर्म (see the rule "ये चाभावकर्मणो:") ।

मित—। सुगमा ॥

११५६ ॥ संयोगादिश्च ॥६।४।१६६ ॥

दी—। इन् प्रकृत्या स्यात् अणिपरे। चक्रिणोऽपत्यं चाक्रिण: ।

Similarly the इन्नन्त base (base ending in इन्) but having a conjunct letter before the इन्, remains unchanged (withot टि-लोप) when अण् follows. Thus चक्रिन् + अण् = चाक्रिण: (without टिलोप) + and here "क्र" is the conjunct letter before इन् ।

मित—। संयोगादि: इन् प्रकृत्या स्यात् अणि परे इति सूत्रार्थ: । "इन् अण्यनपत्ये" इत्यत: 'इन् अणि' इति, "प्रकृत्यैकाच्" इति सूत्रात् "प्रकृत्या" इति चानुवर्त्तते । तत: उक्तोऽर्थो लभ्यते । अन्यत् सुगमम् ॥

११५७ ॥ न मपूर्वोऽपत्येऽवर्मण: ॥६।४।१७० ॥

दी—। मपूर्वोऽन् प्रकृत्या न स्यात्अपत्ये अणि। भाद्रसाम: । 'मपूर्व:' किम् ? सौत्वन: । 'अपत्ये' किम् ? चर्मणा परिवृत: चार्मणो रथ: । 'अवर्मण:' किम् ?—चक्रवर्मणोऽपत्यं चाक्रवर्मण: । "वा हितनाम्न इति वाच्यम्" (वार्तिक)—हितनाम्न: अपत्यं हैतनाम:—हैतनामन: ।

A base ending in अन् but preceded by "म" does not remain as usual but elides its टि—portion, when अण् in the sense of अपत्य follows. Thus भद्रसामन् + अण् (अपत्ये) = भाद्रसाम

(with टि लोप)। Why do we say मपूर्वः in the sutra? Witness सुत्वनः अपत्यम् = सुत्वन् + अण् = सौत्वनः with प्रकृतिभाव i.e. without टिलोप, for here अन्नन्त word सुत्वन् has no "म" before its अन portion. Why do we say अपत्ये in the sutra? Witness चार्मणः रथः with प्रकृतिभाव, for here अण् has sense of अनपत्य। Why again do we say अवर्मणः here? Witness चक्रवर्मण् + अण् (अपत्ये) = चाक्रवर्मणः with प्रकृतिभाव in अपत्ये अणि, for the sutra enjoins this in the case of वर्मन् by saying "अवर्मणः"। The base हितनामन् though has म preceding अन्, still will optionally remain as usual (प्रकृत्या) when अपत्ये अण् follows; thus हितनामन् + अण् (अपत्ये) = हैतनाम (without प्रकृतिभाव) and हैतनामनः (with प्रकृतिभाव)।

मित—। "अणि अन् प्रकृत्या स्यात्"—इत्यस्य प्रतिप्रसवमाह "मपूर्वः अन् प्रकृत्या न स्यात् अपत्ये अणि"॥ भाद्रसामः—अत्र अनः मपूर्वत्वात् न प्रकृतिभावः॥ सूत्रे "मपूर्व"—कथनात्, 'सौत्वन' इत्यत्र मपूर्वत्वाभावात् प्रकृतिभाव एव॥ सूत्रे "अपत्ये" इति विशिष्याभिधानात् 'चार्मणो रथः' इत्यत्र अपत्यार्थत्वाभावात् प्रकृतिभाव एव॥ सूत्रे पुनश्च 'अवर्मणः' इति कथनात् 'चाक्रवर्मणः' इत्यत्र वर्मन्-शब्दसत्वात् प्रकृतिभावः॥ "न मपूर्वः" इति प्रतिषेधे प्राप्ते वार्त्तिकमुपन्यस्यति—'हितनामन्-शब्दस्य अपत्ये अणि प्रकृतिभावो वा स्यात्' इत्यर्थः। एवम् हितनामन् + अण् = हैतनामः (प्रकृतिभावो न), हैतनामनः (प्रकृतिभावः)॥

११५८॥ ब्राह्मोऽजातौ॥६।४।१७१॥

दी—। योगविभागोऽत्र कर्त्तव्यः। 'ब्राह्मः' इति निपात्यते अनपत्ये अणि। ब्राह्मं हविः। ततोजातौ—अपत्ये जातावणि ब्रह्मणः टिलोपो न स्यात्। ब्रह्मणोऽपत्यं ब्राह्मणः। अपत्ये किम्? ब्राह्मी औषधिः।

From the wording of the sutra ब्राह्मः अजातौ, the meaning is that the word ब्राह्म is got. with अण् and टिलोप when जाति (अपत्य) is not meant (cp. "जातावपत्ये निषेधः")। But how then are we to get the form ब्राह्मी (in अनपत्य but जाति) and ब्राह्मण (with अण् in the sense of जाति and अपत्य) ? So Bhattoji says that we are to divide the sutra thus—(i) "ब्राह्मः" i.e ब्राह्म is allowed and irregularly formed with अण् in the sense of अनपत्य (not descendent),—ब्राह्मं हविः, ब्राह्मः संस्कारः, ब्राह्मं सरः, ब्राह्मी औषधिः etc. or in the general sense of अपत्य (but not in the sense of जाति) as ब्राह्मः नारदः ; comp -'ब्राह्मशब्दोऽपत्येऽनपत्ये चेष्यते" Kaiyata. Then as (ii) जातौ—(अपत्ये), the word ब्रह्मन् does not elides its टि—portion when the affix अण् follows yielding ब्रह्मणः अपत्यं (जातिः)=ब्राह्मणः। why do we say अपत्ये here ? —Witness ब्राह्मी औषधिः where there is टिलोप for अनपत्य जाति is meant.

मित—। ब्राह्मः अजातौ इति सूत्रच्छेदः। अजातौ=न तु जातौ (अपत्ये) ; जातावपि ब्राह्मशब्दस्य निपातनं पश्चान्तरे ब्राह्मण शब्दस्य च साधनं दर्शयितुमाह— "योग विभागः अत्र कर्त्तव्यः" इति। "ब्राह्मः". इति एकं सूत्रम्—तदर्थोयथा, ब्राह्म इति—अनपत्ये अणि निपात्यते। तच्च जातौ—यथा ब्राह्मी औषधिः ; अजातौ च—यथा ब्राह्मं हविः इत्यादि। तथा भाष्यम् "ब्राह्म इति निपात्यते अपत्ये अजातौ इति"।...............“या जातिश्च नापत्यं ब्राह्मी औषधिरिति"।.........“जातौ”, इति द्वितीयं सूत्रम्—अत्र "अपत्ये" इत्यनुवर्त्तते ; अर्थो यथा—जातौ अपत्ये अणि ब्रह्मन्शब्दस्य टिलोप न स्यात्। ब्रह्मणः अपत्यम् इति ब्रह्मन्+अण्=ब्राह्मणः। अत्र 'जातौ अपत्ये' इति कथनात्, अनपत्ये जातौ तु—ब्राह्मी औषधिः इति। सर्वमेतत् योगविभागस्य फलम्। पूर्वसूत्रात् "अपत्ये अणि प्रकृत्या न स्यात्" इति अनुवर्त्तनात् अ.ह—अपत्ये जातौ ब्रह्मणष्टिलोपो न स्यात् इति। योगविभागस्तु काशिकायाम् अपि "योगविभागोच क्रियते। ब्राह्मइत्येतत् निपात्यते। अपत्ये

जातावणि न भवति"—। सर्वमेतत् भाष्यसम्मतम्। "ब्राह्मोजातौ"इत्यपि सूत्रपाठः सम्भवति। अर्थश्च योगविभागेन पूर्ववदेव।

११५९। औक्षमनपत्ये ॥ ३।४।१७३ ॥

दी—। अणि टिलोपो निपात्यते। औक्षम् पदम्। अपत्ये किम्?—उक्ष्णोऽपत्यम्=औक्ष्णः।

टि-लोप is irregularly enjoined to the word औक्ष formed with अण् but not in the sense of अपत्य। Thus we get औक्षम् पदम् (with टिलोप)। This sutra bars the rule "अन्" which enjoins प्रकृतिभाव to अन्नन्त words when अण् follows. Why do we say अनपत्ये in the sutra? witness उक्षन्+अण् (अपत्ये)=औक्ष्णः (without टिलोप)। But the question is—how do we get उक्षन्+अण्=औक्ष्णः (with अल्लोप) and not औक्षण (with प्रकृतिभाव), and hence we look ahead—

मित—। सूत्रमिदम्—"अन्" इति प्रकृतिभावस्य अपवादः। स च अपवादः "अनपत्ये" एव। अपत्ये तु प्रकृतिभावः स्यादेव। एवमुक्ष्णः अपत्यम् इत्यत्र उक्षन्+अण्=औक्ष्णः। अत्र कथम् अल्लोपः, न तु प्रकृतिभावः—अतः सूत्रान्तरमुपन्यस्यति—

११६०। षपूर्वहन्धृतराज्ञामणि ॥६।४।१६५॥

दी—। षपूर्वो यः अन् तस्य, हनादेश्च भस्य अतः लोपः अणि। औक्ष्णः। ताक्ष्णः। भ्रौणघ्नः। धृतराज्ञोऽपत्यं धार्त्तराज्ञः। 'षपूर्वः—' इति किम्? साम्नोऽपत्यं सामनः। अणि किम्? ताक्ष्णयः।

The (उपधा) अ elides when the तद्धित affix अण् follows, of bases ending in अन् but having 'ष' preceding, of bases ending

in हन् and of the base धृतराजन्। Thus उक्षन्+अण्=औक्ष्ण: (with अल्लोप); similarly we get ताक्ष्ण, भौणघ्न, वार्त्रघ्न, धार्त्तराज्ञ। why do we say 'षपूर्व—' in the sutra? Witness सामन: (without अल्लोप), for here 'म' precedes अण्। [Note that in सामन, the rule "न मपूर्वोऽपत्ये" (1157) does not apply for this rule requires प्रकृतिभाव निषेध in जाति only]; why do we say अणि here? witness ताक्षण्य (with तक्षन्+ण्य enjoined by the rule "सेनान्तलक्षणकारिभ्यश्च")—here there is no अल्लोप though अन् has 'ष' preceding it; for here the affix is not अण् but ण्य।

मित—। "अल्लोपोऽन:" इति सूत्रमत्र वर्तते। भाधिकार: अस्त्येव, अत आह—"षपूर्वो य: अन् तस्य, हनादेश्च भस्य अत: लोप: स्यात् अणि"। सूत्रे षपूर्वकथनात् मपूर्वस्य अल्लोपो न स्यात्—तत: सामन इति। [अत्र 'न मपूर्वोऽपत्येऽवर्मण:" इति प्रकृतिभावनिषेधो न स्यात्, यत: स निषेधो जातावेव इति फलितं भाति]॥ 'अणि' परे एषनियम:, अत:-'ताक्ष्ण्य' इत्यत्र ण्य-प्रत्यये सति अल्लोपो न स्यात्॥

११६१। क्षत्राद्घ:॥ ४।१।१३८॥

दी—। 'क्षत्रिय:'। जातौ इत्येव। क्षात्रिरन्य:।

The word क्षत्र takes the affix घ (इय) in the sense of अपत्य and जाति। Thus क्षत्र+घ=क्षत्रिय: in the sense of जाति (and अपत्य)। Otherwise the form is क्षात्रि i.e.' one born from a क्षत्रिय in a शूद्रा।

मित—। क्षत्रात् शूद्रादौ जात: क्षात्रि:, न तु क्षत्रियजाति:॥

११६२। कुलात्ख:॥ ४।१।१३९॥

दी—। कुलीन:। तदन्तादपि। उत्तरसूत्रे 'अपूर्वपदात्' इति लिङ्गात्—आढ्यकुलीन:।

The word कुल takes the affix ख (ईन) in the sense of अपत्य। From the word 'अपूर्वपदात्' in the following rule, we infer that कुल also takes ख (तद्धिते) when final in a word. The use of the epithet अपूर्वपदात् in the next rule qualifying "कुलात्", shows that there was प्राप्ति of ख to कुल having पूर्वपद as well. Hence Bhattoji says "तदन्तादपि—उत्तरसूत्रे 'अपूर्वपदात्' इति लिङ्गात्"। Thus we get both कुलीन and आढ्यकुलीन with ख (तद्धिते)।

मित—। अपत्ये कुलशब्दात् ख-प्रत्ययः स्यात्। खस्य ईनादेशः इति उक्तं प्राक्। "समासप्रत्ययविधौ" तदन्तविधिनिषेधात् कुलान्तात् शब्दात् कथं खः स्यात्? इत्यत्रोत्तरमाह—उत्तरसूत्रे 'अपूर्वपदात् कुलात्' इति कथनात् ज्ञायते यदत्र सूत्रे कुलान्तात् शब्दादपि खप्रत्ययस्य प्राप्तिरासीत्। ततश्च आढ्यकुलीनः, महाकुलीन इत्यादि सिध्यति।

११६३॥ अपूर्वपदादन्यतरस्याम् यड्ढकञौ ॥४।१।१४०॥

दी—। 'कुलात्' इत्येव। पक्षे खः। कुल्यः, कौलेयकः, कुलीनः। 'पद' ग्रहणं किम्? बहुकुल्यः—बाहुकुलेयकः—बहुकुलीनः।

The base कुल having no पूर्वपद preceding it optionally takes यत् and ढकञ् (एयक); in the alternative ख also comes in. Thus कुल्य (with यत्), कौलेयक (with ढकञ्) and कुलीन (with ख)। Why do we say 'पद' in अपूर्वपदात् in the sutra? Witness बहुकुल with बहुच्—प्रत्यय before the word कुल; now here बहुच् (बहु) not being a पद but a प्रत्यय only by the rule "विभाषा सुपः" —कुल is no longer preceded by पूर्वपद, so the rule even now applies and we get बहुकुल्य, बाहुकलेयकः, and बहुकुलीनः।

मित—। पूर्वपदरहितात् कुलशब्दात् यत्, ढकञ् भवतः। पक्षे यथाप्राप्तः खः स्यात्॥ सूत्रे 'पद'—ग्रहणात्, "विभाषा सुपः" इत्यनेन बहुच् प्रत्ययस्य च पदत्वविरहात्, बहुकुलात् अपि यत्—ढकञ्—खाः प्रत्ययाः भवन्ति।

११६४॥ महाकुलात् अञ्-खञौ ।४।१।१४१॥

दी—। 'अन्यतरस्याम्' इत्यनुवर्तते। पक्षेखः। माहाकुलः माहाकुलीनः, महाकुलीनः।

Here also the word अन्यतरस्याम् (optionally) comes down; alternatively ख also comes in after महाकुल। अञ् and खञ् being ञित्—affixes yield आदिवृद्धि in तद्धित। So माहाकुल, and माहाकुलीनः, alternatively महाकुलीनः as well.

मित—। 'अन्यतरस्याम्'—ग्रहणानुवृत्तेः, एकपक्षे अञ्‌खञौ भवतः, अन्यपक्षे खः अपि। अन्यथा सूत्रमिदम् अपवादभूतञ्चेत्; तदा अपवादेन मुक्ते उत्सर्गस्य अप्रवृत्तेः खप्रत्ययो न भवेत्।

११६५। दुष्कुलात् ढक् ।४।१।१४२॥

दी—। पूर्ववत् पक्षे खः। दौष्कुलेयः—दुष्कुलीनः॥

The word दुष्कुल takes as before optionally ढक् (एय) and alternatively ख।

मित—। सुगमा॥

११६६। स्वसुश्छः॥

दी—। स्वस्रीयः।

The word स्वसृ takes छ (ईय) in the sense of अपत्य।

मित—। सुगमा।

११६७। भ्रातुर्व्यच्च ।४।१।१४४॥

दी—। चात् छः। अणोऽपवादः। भ्रातृव्यः—भ्रात्रीयः।

The word or the base भ्रातृ takes the affix व्यत् as well as छ in the sense of अपत्य। This rule bars अण् (due after भ्रातृ)।

मित—। सुगमा—।

११६८। व्यन् सपत्ने ।४।१।१५५।

दी—। भ्रातुर्व्यन् स्यादपत्ये, प्रकृतिप्रत्ययसमुदायेन शत्रौ वाच्ये। भ्रातृव्यः शत्रुः। "पाप्मना भ्रातृव्येन" इति तूपचारात्।

The base भ्रातृ takes the तद्धित affix व्यन् to denote अपत्य, provided also the whole original word along with the प्रत्यय denotes an enemy (शत्रु)। Thus भ्रातृव्यः शत्रुः (the son of a brother, who is an enemy). Then how do we get the use पाप्मना भ्रातृव्येण; for भ्रातृव्य itself denoting शत्रु, its qualifying epithet as पाप्मना becomes unnecessery. Hence Bhattoji says that this usage is due to attributing of हिंसकगुण on भ्रातृव्य by transference.

मित—। "अत्र भ्रातृशब्दार्थस्तु न विवक्षितः" किन्तु सपत्नार्थः। तच्च सपत्नार्थे एव भ्रातृव्यः। एवं चेत् "कथं पाप्मना भ्रातृव्येण' सिद्धः? उपमानात् सिद्धम् भ्रातृव्य इव भ्रातृव्य" इति भाष्यम्। तदेव प्रकारान्तरेण दीक्षितः कथयति—"उपचारात्" इति—"हिंसकत्वगुणयोगात् लाक्षणिकार्थात्"। "व्यत्", "व्यन्" इति प्रत्यययोः भिन्नत्वं च स्वरार्थं बोध्यम्॥

११६९। रेवत्यादिभ्यष्ठक् ।४।१।१४६॥

११७०। ठस्येकः ।७।३।५०॥

दी—। अङ्गात् परस्य ठस्य इकादेशः स्यात्। रैवतिकः।

Words of the रेवत्यादि class take ठक् (अपत्य)। Now of ठक क् is इत् (i.e. it elides), and ठ is replaced by इक when it comes

after an अङ्ग, as फ् is replaced by आयन्, ढ by एय, ख by ईन्, छ by ईय and घ by इय (see "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" in स्त्री प्रत्यय)। Thus रेवती + ठक् (इक) = रेवत् + इक (by "यस्येति च") = रैवतिकः (by आदिवृद्धि in तद्धित)।

मित—। अपत्ये ठक् इति सूत्रार्थः। ठकारस्य इक आदेशः स्यात् अङ्गात् परश्चेत्। "अङ्गात्" इति कथनात् 'कर्मठः' इत्यत्र ठकारस्य इकः न स्यात्, तत्र कर्मन् + अठच् इति प्रत्यये सति अठचः ठकारः अङ्गात्परो न भवति अकारेण व्यवधानात्। गणो यथा—रेवती, द्वारपाली—अश्वपाली वृकग्राह—कर्णग्राह—प्रभृतयः।

११७१। गोत्रस्त्रियाः कुत्सने ण च ॥४।१।१४७॥

दी—। गोत्रं या स्त्री तद्वाचकात् शब्दात् ण-ठकौ स्तः कुत्सायाम्। सामर्थ्यात् यूनि। गार्ग्या अपत्यं गार्गो गार्गिको वा जाल्मः। "भस्याढे तद्धिते" पुंवद्भावात् गार्ग्यशब्दात् ण-ठकौ। 'यस्येति—' लोपः। 'आपत्यस्य—' इति यलोपः।

The fem. base ending in a गोत्रप्रत्यय, further takes the affixes ण and ठक् when a युवप्रत्यय (अपत्यार्थे) follows if censure (कुत्सा) is implied. As only one गोत्रप्रत्यय is added to a base by the rule "एकोगोत्रे", so a further अपत्यप्रत्यय after a गोत्रवाचक स्त्रीप्रत्ययान्त शब्द must naturally be is the sense of युवापत्य, hence Bhattoji here says "सामर्थ्यात् यूनि" i. e. गोत्रवाचक fem. bases take युवार्थे ण and ठक् if कुत्सा is denoted. Thus गर्गस्य गोत्रापत्यम् = गार्ग्य (with यञ्), then गार्ग्य + ङीप् = गार्ग्य् + ङीप् (by "यस्येति च") = गार्ग् + ङीप् (with यलोप by "हलस्तद्धितस्य") = गार्गी। This fem. base ending in a गोत्रप्रत्यय will take युवापत्यप्रत्यय, ण and ठक् by the present rule ; गार्ग्या युवापत्यम् इति गार्गी + ण or ठक = गार्ग्य + ण वा ठक् by पुंवद्भाव = गार्ग्य् + ण वा ठक् (by "यस्येति च") = गार्ग् + ण वा ठक् (with यलोप) = गार्गः

वा गार्गिकः। To show censure here, Bhattoji in the example adds 'जाल्मः' (a rogue or villian or bastard). To show the above process here Bhattoji says "भस्य ढे तद्धिते" इति पुंवद्भावः (of the base गार्गी here); here पुंद्भाव of गार्गी will bring the original गोत्रप्रत्ययान्त base गार्ग्य here ; then its अ will elide by the rule "यस्येतिच", so Bhattoji adds—यस्येति लोपः। Then the final य् elides by the rule "आपत्यस्य च तद्धितेऽनाति" for it is अपत्ययकार। So finally we get गार्ग् + ण वा ठक् = गार्गः वा गार्गिकः।

Though this very form is got without पुंवद्भाव even, still to show the real process (वस्तुस्थिति) here Bhattoji himself says all this.

मित—। 'ण' इति लुप्तप्रथमाकम्। चकारात् 'ठक्' आकृष्यते, तदाह—"गोत्रं या स्त्री तदन्तात् शब्दात् ण-ठकौ स्तः कुत्सायाम्"। गोत्रप्रत्ययान्तात् अपत्ये एतौ प्रत्ययौ स्तः, किन्तु "एको गोत्रे" इति सूत्रानुसारेण गोत्रे एक एव प्रत्ययो भवेत्, तदा इह का गतिः इत्याशङ्क्याह—'सामर्थ्यात्' नियमात् 'यूनि' (गोत्रप्रत्ययान्तात्) युवप्रत्यये सति एतत् सूत्रं प्रवर्त्तते। गार्ग्या अपत्यं युवा इति गार्गः (ण प्रत्ययः), गार्गिकः (ठप्रत्ययः)। "पितुरविज्ञाने मात्राव्यपदेशः इति कुत्सनम्"—बालमनोरमा। अत्र प्रक्रियास्थितिः तु आङ्गलभाषायां दर्शिता ; भट्टोजिना तदेव स्वयमुच्यते—पुंवद्भावात् 'गार्ग्य' शब्दात् णठकौ। ततः "यस्येति—" अकारलोपः। ततः "आपत्यस्य—" इति यकारलोपः॥

११७२। वृद्धाट्ठक् सौवीरेषु बहुलम् ॥४।१।१४८॥

टी—। सुवीरदेशोद्भवाः सौवीराः। वृद्धात् सौवीरगोत्रात् यूनि बहुलं ठक् स्यात् कुत्सायाम्। भागवित्तेर्भागवित्तिक। पक्षे फक् = भागवित्तायनः।

When a युवप्रत्यय (अपत्यार्थे) follows a गोत्रप्रत्ययान्त word—it

denoting a सौवीर गोत्र—and having an initial वृद्धि vowel (which is thus a वृद्ध word by "वृद्धिर्यस्याचामादिस्तत् वृद्धम्"), then this word optionally takes ठक् to denote censure. Thus भागवित्ति (ending in गोत्रप्रत्यय इञ)+ठक् (युवप्रत्यय)=भागवित्तिकः (when कुत्सा is denoted), optionally we get भागवित्तायन with फक् by the rule "यञिञोश्च"।

मित—। पूर्वसूत्रात् 'गोत्र' इति वर्त्तते। तच्च विशिष्यते, 'सौवीरगोत्रात्', 'वृद्धात्' च ("वृद्धिर्यस्याचामादिस्तत् वृद्धम्" इति सूत्रेण) वृद्धसंज्ञकात् सौवीरगोत्रात् इत्यर्थः। शेषं पूरयन् आह—युवार्थकप्रत्यये परे कुत्सायां च द्योत्ये पक्षे ठक् स्यात्। ठगभावे "यञिञोश्च" इति सूत्रेणैव फक् स्यात् तदाह "पक्षे फक्—भागवित्तायनः"।

११७३। फेश्छ च ॥ ४।१।१४९ ॥

दी—। फिञन्तात् सौवीरगोत्रात् अपत्ये छः ठक् च कुत्सने गम्ये। यमुन्दस्यापत्यं यामुन्दायनिः। तिकादित्वात् फिञ्। तस्यापत्यं यामुन्दायनीयः—यामुन्दायनिकः। कुत्सने किम्? यामुन्दायनिः—औत्सर्गिकस्याणो 'ण्यक्षत्रिय—" इति लुक्। सौवीरेति किम्? तैकायनिः।

When a युवापत्यप्रत्यय follows a word ending in the affix फिञ् and denoting a सौवीर गोत्र, then this word takes the affix छ and ठक् if censure is implied. यमुन्दस्य अपत्यं gives यामुन्दायनि with फिञ् by the rule "तिकादिभ्यः फिञ्"। Now this फिञन्त word denotes a सौवीर गोत्र, and when again a युवप्रत्यय is to follow (with कुत्सा) then it is छ and ठक्। Thus यामुन्दायनि+छ=यामुन्दायनीयः, with ठक् it is यामुन्दायनिकः। Why do we say "कुत्सने"? Witness यामुन्दायनिः—with अण् by the

general rule (उत्सर्ग) "तस्यापत्यम्" ; and this अण् eliding by the rule "ण्यक्षत्रियार्षञितो यूनि लुगणिञोः", because here no censure is implied. Bhattoji says all this by "कुत्सने किम् ? —यामुन्दायनिः—औत्सर्गिकस्य अणः 'ण्य क्षत्रिय—' इति लुक्" । Why again do we say "सौवीरगोत्र" here ? Witness तैकायनिः—it does not denote a सौवीर गोत्र, so ठ and छ do not come, but the general अण् comes in and at the same time it elides by "ण्यक्षत्रिय—" as before yielding तैकायनि without छ or ठक् by the present rule.

मित—। 'छ' इति लुप्तप्रथमाकम्, यथा 'ण' इत्यत्र। चकारात् 'ठक्' आकृष्यते। "सौवीर गोत्रे, कुत्सने" इति पूर्वसूत्रादनुवर्त्तने, तदाह—"फिञन्तात् सौवीरगोत्रात् छः ठक् च कुत्सने" ॥ अन्यत् सुर्वं स्पष्टम् ॥

११७४। फाण्टाहृतिमिमताभ्यां णफिञौ ॥ ४।१।१५० ॥

टी—। सौवीरेषु। "नेह यथासंख्यम्', 'अल्पाच्तरस्य परनिपातात् लिङ्गात्' इतिवृत्तिकारः। भाष्ये तु "यथासंख्यमेव" इति स्थितम्। फाण्टाहृतः—फाण्टाहृतायनिः। मैमतः—मैमतायनिः।

The word फाण्टाहृति in the sense of सौवीरगोत्र takes ण and फिञ् when a युवप्रत्यय follows. "कुत्सने" does not come in here ; ण and फिञ् attach to both the words and these do not attach respectively to the two words ; for in that case that which has fewer vowels should have been placed first, whereas here 'मिमत' having fewer vowel is placed later. From this vrittikara (Kasika) infers thus. But Bhashya has—यथासंख्यान्वय। Bhattoji follows both and says फाण्टाहृत (with ण) and फाण्टाहृतायनिः (with फिञ्)। Thus फाण्टाहृतस्य गोत्रापत्यं gives

फाण्टाहृति with इञ् by the rule "अत इञ्"। Then फाण्टाहृतेः अपत्यं युवा इति फाण्टाहृति + ण = फाण्टाहृतः, and फाण्टाहृति + फिञ् = फाण्टाहृतायनिः।

मित—। अत्र "कुत्सने" इति निवृत्तम्॥ "मैमत इति—मिमतस्यापत्यमिति विग्रहः। मिमतशब्दं सौवीरगोत्रादिति न सम्बध्यते। व्याख्यानात् गोत्रत्वाभावाच्च" —(बालमनोरमा)।

११७५। कुर्वादिभ्यो ण्यः॥ ४।१।१५१॥

टी—। अपत्ये। कौरव्याः ब्राह्मणाः। वावदूक्याः। "सम्राजः क्षत्रिये" (गणसूत्रम्)—साम्राज्यः। साम्राजोऽन्यः॥

Words of the Kuru-class (here Kuru denoting name of Bramahana only) take the affix ण्य in the sense of अपत्य।

Thus we get कुरु + ण्य (अपत्ये) = कौरव्य with आदिवृद्धि and गुण (by "ओर्गुणः"); then in बहुवचन we get कौरव्याः ब्राह्मणाः। The instance in बहुवचन with ब्राह्मणाः as विशेष्य is to show its difference from the application of the rule "कुरुनादिभ्यो ण्यः" to be enumerated later here—this later rule gives ण्य after कुरु etc. if these denote both a क्षत्रियजाति and जनपद as well ; and then the affix elides in the plural by "तद्राजस्य बहुषु तेनैवास्त्रियाम्।" But all these are ineffective in the present rule—for here कुरु denotes Brahmanas only and not "क्षत्रिय and जनपद" as well. Thus Kasika here says "कुरुशब्दात् अपरो ण्यप्रत्ययो भविष्यति स तु क्षत्रियात् तद्राजसंज्ञकः तस्य बहुषु लुका भवितव्यम् अयं तु श्रूयते एव"।

The ganasutra here says that सम्राज् takes ण्य in the sense of क्षत्रिय only.

मित—। 'सौवीरेषु' इति 'बहुलम्' इति चात्र सूत्रे निवृत्तम्, शेषं पूरयन्नाह—'अपत्ये'। "कुरुर्नाम कश्चित् ब्राह्मणः तस्य अपत्यानि इति कौरव्याः। ण्यप्रत्यये, ओर्गुणे, अवादेशः, आदिवृद्धिश्च"—इति कुरु + ण्य = कौरव्याः। "यस्तु 'कुरुनादिभ्योण्यः" इति ण्यः—वक्ष्यते, तस्य तद्राजत्वात् बहुषु लुकि कुरवः क्षत्रियाः इति भवति। एतत् सूचनार्थमेव बहुवचनं, ब्राह्मणा इति विशेष्यञ्चोदाहृतम्" (बालमनोरमा)। वावदूकस्य अपत्यानि इति वावदूक + ण्य = वावदूक्याः। साम्राजोऽन्यः—क्षत्रियादन्यः शूद्रादौ उत्पन्न इत्यर्थः। कुरु—कौरव्य-शब्दयोः क्षत्रियवचनयोः तिकादिषु पाठात् फिञपि भवति इति बोध्यम्।

कुर्वादिर्यथा—कुरु, गर्गर, मङ्गुष, अजमार, रथकार, वावदूक, 'सम्राजः क्षत्रिये', कवि, मति, कापिञ्जलादि, वाक्, वामरथ, पितृमत्, इन्द्रजालि, ऐजि, वातकि, दामोष्णीषी, गणकारि, कैशोरि, कुट, शलाका, मुर, पुर, एतका, शुभ्र, अभ्र, दर्भ, केशिनी, वेना छन्दसि ("कथं भाषायां वैन्यो राजेति ? छान्दस एवायं कविभिः प्रमादात् प्रयुक्तः"), शूर्पणाय, श्यावनाय, श्यावरथ, श्यावपुत्र, सत्यङ्कार, वडभीकार, पथिकार, मूढ़, शकन्धु, शङ्कु, शाक, शाकिन्, श्यालीन, कर्तृ, हर्तृ, इन, पिण्डी, तक्षन्, वामरथस्य कण्वादिवत् स्वरवर्जम्।

११७६। सेनान्त-लक्षण-कारिभ्यश्च ॥ ४।१।१५२ ॥

दी—। एभ्यो ण्यः (अपत्ये ?)। 'एति संज्ञायाम्—' इति सस्य षः। हारिषेण्यः। लाक्षण्यः। कारिः शिल्पी, तस्मात्। तान्तुवाय्यः। कौम्भकार्य्यः। नापित्यः।

words ending in सेना (वा—सेन), the word लक्षण, and words that denote some 'artisan' take the affix ण्य in the sense of अपत्य। Thus here Kasika says "कारिशब्दः कारूणां तन्तुवायादीनां वाचकः", and here Bhattoji also has "कारिः शिल्पी तस्मात्"। Then हरिषेण + ण्य = हारिसेण्य। In हरिषेण we have cerebral by the rule

"एति संज्ञायामगात्" (see सर्वसमासशेष)। Similarly लाक्षण्य, तान्तुवाय्य etc.

मित—। सूत्रार्थोयथा—सेनान्तात् प्रातिपदिकात्, लक्षणशब्दात् कारिवाचकेभ्यः च अपत्ये ण्य-प्रत्ययो भवति। कारि-शब्दस्यार्थमाह—"कारिः शिल्पी, तस्मात्"। अन्यत् मूले स्पष्टम्।

११७७। उदीचामिञ् ॥ ४।१।१५३ ॥

दी—। हारिषेणिः। लाक्षणिः। तान्तुवायिः। कौम्भकारिः। नापितात्तु परत्वात् फिञेव। नापितायनिः। "तक्ष्णोऽण उपसंख्यानम्"। "षपूर्व—" इत्यनोऽकारलोपः। ताक्ष्णः। पक्षे ताक्षण्यः।

This rule states इञ् (optionally) according to northern professors in cases of the conditions of the prior rule "सेनान्तलक्षणकारिभ्यश्च"। Thus we also get हारिषेणिः &c with इञ्। The word नापित however having an initial वृद्धि vowel (i.e, आ) takes फिञ् (आयनि) by the later rule "उदीचां वृद्धादगोत्रात्" yielding नापितायनि (optionally). The base तक्षन् is read in the शिवादि list, so it takes अपत्ये अण् and it being counted here ण्य as well comes after it by the prior rule. Then तक्षन् + अण् = ताक्ष्णः (with अकार- लोप by the rule "षपूर्वहन्धृतराज्ञामणि"), with ण्य the form is ताक्षण्यः।

मित—। सुगमा॥ ण्ये प्राप्ते अनेन उदीचामनेन इञ् विधीयते। तक्षन्-शब्दः शिवादिः, तेन अयमिञ् बाध्यते, किन्तु वार्त्तिकेन कारिलक्षणो ण्य-प्रत्ययः स्यादेव। अणि तु प्रकृतिभावस्ततो "षपूर्व—" इति सूत्रेण अकारलोपे ताक्ष्णः इति स्यात्। ण्ये तु ताक्षण्यः। "ये चाभावकर्मणोः" इति प्रकृतिभावान्न टिलोपः।

११७८। तिकादिभ्यः फिञ् ।४।१।१५४ ॥

दी—। तैकायनिः।

Words of the तिकादि class take फिञ् in the sense of अपत्य। This bars इञ् that would otherwise have come to them.

मित—। तिकादिर्यथा—तिक, कितव, संज्ञा, बाल, शिखा, उरस्, शाट्य, सैन्धव, यमुन्द, रूप्य, ग्राम्य, नील, अमित्र, गौकक्ष, कुरु, देवरथ, तैतिल, औरस, कौरव्य, भैरिकि, भौलिकि, चौपत, चैटयत, शैकयत, चैतयत, ध्वाजवत्, चन्द्रमस्, शुभ, गङ्गा, वरेण्य, सुयामन्, आरद्ध, वाह्यक, खल्प, वृष, लोमक, उदन्य, यज्ञ।

अत्र यः कौरव्यशब्दः पठ्यते स च क्षत्रियवचन तिकादिपाठात् अस्मात फिञ् भवति।

११७९। कौशल्यकार्मार्याभ्यां च ॥ ४।१।१५५ ॥

दी—। अपत्ये फिञ्। इञोऽपवादः। परमप्रकृतेरेवायम् इष्यते॥ प्रत्ययसन्नियोगेन प्रकृतिरूपं निपात्यते। कोसलस्यापत्यं कौसल्यायनिः। कर्मारस्यापत्यं कार्मार्यायणिः। छागवृषयोरपि॥ छाग्यायनिः। वार्षाायणिः।

The words कौसल्य (कौशल्य) and कार्मार्य take फिञ् in the sense of अपत्य। This thus bars इञ् due after these by—अत इञ् वा बाह्वादि इञ्। This फिञ् is intended to be added to the base कोसल &c turned to कौसल्य &c. by addition of युट् (as declared in the Bhashya). Hence कौसल्य &c. are readin the sutra, so that फिञ् is to come to the orginal word (परमप्रकृति) कोसल &c, turned irregularly as कौसल्य &c. with the addition of the affix युट् (प्रत्ययसन्नियोगेन)। Thus कोसलस्यापत्यम् = कौसल्य (with युट) + फिञ् = कौसल्यायनि। Similarly कार्मार्यायणि from कर्मार (irregularly turned to कार्मार्य by adding युट्)। The varttika (छाग &c)—

says that this फिञ् is to come here after युट् has been added to these also.

मित—। अपतेत्र फिञ् विहितः स च 'परमप्रकृतेः' मूलशब्दात् मूलशब्दस्य कोसल-कर्मार-शब्दस्य एव इष्यते । स च मूलशब्दः फिञि सति सदैव युटप्रत्ययसन्नियोगेन सूत्रोक्त कौसल्य-कार्मार्य्यरूपं निपातनात् प्रतिपद्यते इति भाष्ये स्थितम् । एवं कौसलस्यापत्यम् इति कोसल + फिञ् = कौसल्य + फिञ् = कौशल्यायनिः । एवं कर्मारस्यापत्यम् कार्मार्य्यायणिः । छागवृषशब्दयोरपि फिञि सति युट च वक्तव्यम् इति वार्त्तिकार्थः —तेन छाग्यायनिः, वार्ष्यायणिः ।

११८० । अणो द्व्यचः । ४।१।१५६ ॥

दी—। अपत्ये फिञ् । इञोऽपवादः । कार्त्रायणिः । 'अणः' इति किम् ? दाक्षायणः । द्व्यचः किम् ? औपगविः । "त्यदादीनां फिञ् वा" (वार्तिकं) । त्यादायनिः ; त्यादः ।

The affix फिञ् is attached in the sense of अपत्य after a word ending in the affix अण् and having two vowels (द्वि अच्) । This bars इञ् due by "अत इञ्" &c । Thus कर्तुः छात्रः इति कर्तृ + अण् = कार्त्रम् ("तस्येदम्" इत्यण्) । Then this अणन्त word कार्त्र takes फिञ् in the sense of अपत्य as कार्त्र + आयनि = कार्त्रायणिः । why do we say 'अणः' (ending in the affix अण्) here ? witness दाक्षायणः (from दाक्षि + फक् by the rule "यञिञोश्च")—दाक्षि not ending in अण्, फिञ् (आयनि) does not come after it by the present rule ; why do we say द्व्यचः (having two vowels) in the sutra ?—witness औपगविः (from औपगव + इञ् = औपगवि) with इञ ; for though औपगव ends in अण्, still it having more then two vowels do not take फिञ् । Words of the त्यदादि class (as enumerated under the सर्वादि list of सर्वनाम words) take optionally फिञ् in

the sense of अपत्य। Thus त्यादायनिः and त्यादः। so also यादायनिः and यादः (from यद्) & so on. Here अण् comes by the genaral rule "तस्यापत्यम्"।

मित—। अणन्ताद् द्व्यचः प्रातिपदिकात् अपत्ये फिञ् प्रत्ययो भवति। सूत्रमिदम् "अतइञ्" इत्यस्यापवादः, अत आह—"इञोपवादः"। कर्त्तृः क्षत्र इति कर्त्तृ + अण् ("तस्येदम्" इत्यण्) = कार्त्रः। तस्यापत्यम् इति कार्त्र + फिञ् = कार्त्रायणिः॥ 'अणः' इति उक्तत्वात् दाक्षेः अपत्यम् युवा इति दाक्षायणः ("यञिञोश्च" इति फक्)—अदन्तत्वाभावात् फिञ् न स्यात्॥ 'द्व्यचः' इति उक्तत्वात् बह्वचोपि अणन्तात् औपगव-शब्दात् फिञ् न स्यात् किन्तु इञेव॥ त्यद् तद्, यद् प्रभृतीनाम् विकल्पेन फिञ् स्यात्, पक्षे औत्सर्गिकः अणेव भवति। वार्त्तिकमिदं वृत्तिकारानुरोधेन इहोपन्यस्तम्। भाष्ये च एतन्नास्ति। "त्यदादीनि च" इति त्यदादीनां वृद्ध-संज्ञाहेतोः "उदीचां वृद्धादगोत्रात्" इत्येव फिञः प्रकृतत्वात्; पक्षान्तरे अणपि।

११८१। उदीचां वृद्धादगोत्रात्॥ ४।१।१५७॥

दी—। आम्रगुप्तायनिः। प्राचां तु—आम्रगुप्तिः। वृद्धात् किम्? दाक्षिः। 'अगोत्रात्' किम्? औपगविः।

According to northern professors, the वृद्ध words (i.e, words having an initial वृद्धि vowel) that do not signify any "गोत्र", take the affix फिञ् optionally after them in the sense of अपत्य। Thus आम्रगुप्तायनि (with फिञ्), but आम्रगुप्ति (with इञ् acc. to eastern or old opinion). By this rule we get नापितायनि (as hinted before). Why do we say 'वृद्धात्' here? witness दाक्षि with इञ्, for दक्ष has no initial वृद्धि vowel in it. Why again we have अगोत्रात् here? Witness औपगवि (with इञ्)—औपगव denoting a गोत्र, its युवापत्य is expressed by the affix इञ and not फिञ् (as enjoined in this rule).

मित—। वृद्धं यच्छब्दस्वरूपम् अगोत्रं तस्मात् अपत्ये फिञ् स्यात् उदीचाम् आचार्य्याणां मतेन ॥ सूत्रे 'वृद्धात्' इति कथनात् दक्षस्यापत्यम् इति दाक्षिः (इञ्), न तु फिञ् ॥ 'अगोत्रात्' इति कथनात् औपगवशब्दस्य युवापत्ये च गोत्रत्वात् इञेव स्यात्, न तु फिञ् ॥ इदमप्यत्र अवधेयम्—कारिशब्दादपि वृद्धात् अगोत्रात् परत्वात् अनेनैव फिञ् स्यात्—नापितायनिः ॥

११८२। वाकिनादीनां कुक् च ॥ ४।१।१५८ ॥

टी—। अपत्ये फिञ् वा। वाकिनस्यापत्यं वाकिनकायनिः ; वाकिनिः।

Words of the वाकिन—*group* optionally take the affix फिञ् in the sense of अपत्य, and when फिञ् comes in, the augment कुक् is also ordered therein (cp "फिञ् प्रत्ययो भवति तत्सन्नियोगेन एषां कुगागमः"—*Kasika*)—witness वाकिनकायनिः। Otherwise अदन्तलक्षण इञ् comes in yielding वाकिनिः।

मित—। वाकिनादिर्यथा—वाकिन, गौधेर, कर्कश, काक, लङ्का, चर्मिवर्मिणो-र्नलोपश्च ॥ सूत्रे चकारात्—'उदीचाम्' इति 'फिञ्' इति च वर्त्तते, तदाह "अपत्ये फिञ् वा"। फिञि सति तत्सन्नियोगेनैव एषां 'कुक्' आगमश्च भवति। पक्षे इञ्। कुगागमस्य कित्वात् अन्त्यादेशः वाकिन + आयनि = वाकिनकायनिः। पक्षे इञि सति वाकिनिः।

११८३। पुत्रान्तादन्यतरस्याम्। ४।१।१५९ ॥

टी—। अस्मात् वा फिञ् सिद्धः, तस्मिन् परे पुत्रान्तस्य वा कुक् विधीयते। गार्गीपुत्रकायणिः-गार्गीपुत्रायणिः-गार्गीपुत्रिः।

Words ending in पुत्र and having an initial वृद्धि vowel optionally takes फिञ् and when again फिञ् is attached the augment कुक् optionally comes in, yielding—गार्गीपुत्रकायणिः (with फिञ् and कुक), गार्गीपुत्रायणिः (with फिञ् but no कुक्),

and गार्गीपुत्रि (without फिञ् and कुक्, but with इञ् as in the case of वाकिनि)।

मित—। 'उदीचाम्' इति, 'वृद्धात्' इति च वर्त्तते। पुत्रान्तम् अगोत्रम् इति पूर्वसूत्रेण ("उदीचां वृद्धादगोत्रात्" इत्यनेन) सिद्धे सति अनेन विकल्पेन कुगागमो विधीयते। पुत्रान्तात् प्रातिपदिकात् यः फिञ् स्यात् तस्मिन् परे सति कुगागमो वा भवति पुत्रान्तस्य वृद्धशब्दस्य। एवं त्रिरूपं दृश्यते गार्गीपुत्रकायणिः इत्यादि मूले यथा।

११८४। प्राचामवृद्धात् फिन् बहुलम्। ४।१।१६०॥

टी—। ग्लुचुकायनिः।

According to Eastern (or old ?) professors, the affix फिञ् is attached to words which are not technically called वृद्ध words—in the sense of अपत्य। Thus ग्लुचुकस्यापत्यम् = ग्लुचुक + आयनि = ग्लुचुकायनि (without आदिवृद्धि, for फिन् is not ञ—इत् or ण—इत् or क—इत्)।

मित—। अवृद्धशब्दात् अपत्ये बहुलं फिन्—प्रत्ययो भवति 'बहुलग्रहणात्' विकल्पेन भवति इति ज्ञेयम्; तेन 'ग्लौचुकिः' इत्यपि इञा सिध्यति। "'प्राचाम्', 'अन्यतरस्याम्', 'बहुलम्'—इति सर्वएते विकल्पार्थकाः एतेषामेकेनैव विकल्पे सिद्धे इह प्राचाम् ग्रहणम् पूजार्थम्"—इति काशिका। बहुलग्रहणं वैचित्र्यार्थम् च—क्वचिन्नैव भवति; दाक्षिः, प्लाक्षिः। 'अवृद्धात्' कथमुक्तम्? 'राजदन्तिः' इति वृद्धात् फिन न स्यात्।

११८५। मनोर्जातावञ्यतौ षुक् च। ४।१।१६१॥

टी—। समुदायार्थो जातिः। मानुषः, मनुष्यः।

The word मनु takes the affixes अञ् and यत् in the sense of जाति, then when these affixes follow the augment षुक् comes in, yielding both मानुष (with अञ् + षुक्) and मनुष्य (with यत् and षुक)। As the whole resultant word denotes जाति, so Bhattoji says "समुदायार्थो जातिः"।

मित—। मनुशब्दात् अञ् यत् इत्येतौ प्रत्ययौ भवतः, तत्सन्नियोगेन षुगागमश्च। प्रकृतिप्रत्ययसमुदायेन चेत् जातिर्गम्यते। मनोरपत्यं जातिः इति मनु+अञ्= मनुष्+अञ्=मानुषः। एवं मनु+यत्=मनुष्+यत्=मनुष्यः। अत्र केवलापत्यार्थः नास्त्येव। अतः 'मानुषा' इत्यत्र वहुत्वे "यञञोश्च" इति लुक् न स्यात्। अपत्यविवक्षायाम् तु अणेव भवितव्यम्—मानवी प्रजा। तथा च—"अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः। नकारस्य च मूर्द्धन्यस्तेन सिध्यति माणवः"॥

११८५। जनपदशब्दात् क्षत्रियादञ्। ४।१।१६८॥

दी—। जनपदक्षत्रिययोर्वाचकात् अञ् स्यादपत्ये। "दाण्डिनायन—" इति सूत्रे निपातनात् टिलोपः। ऐक्ष्वाकः। ऐक्ष्वाकौ। "क्षत्रियसमानशब्दात् जनपदात् तस्य राजन्यपत्यवत्"—(वार्तिक); तद्राजम् आचक्षाणस्तद्राज इत्यन्वर्थसंज्ञासामर्थ्यात्। पञ्चालानां राजा पाञ्चालः। "पूरोरण् वक्तव्यः"—(वार्तिक); पौरवः। "पाण्डोर्ड्यण्"—पाण्ड्यः।

The affix अञ् comes in the sense of अपत्य after a word that denotes both a country and a Kshattriya (race). Thus इक्ष्वाकु denoting both a country and a Kshattriya king is to take अञ् by this rule. इक्ष्वाकुर्नाम देशः, क्षत्रियः राजा च। तस्य राजा or अपत्यम्=इक्ष्वाकु+अञ्=ऐक्ष्वाकः, irregularly formed with टिलोप by the rule "दाण्डिनायन—" (rule 1145 ante). [N. B.—Thus अञ् etc. denoting both राजा and अपत्य are called तद्राज affix and these elide in the plural as will be seen later, so Bhattoji here says "ऐक्ष्वाकः—ऐक्ष्वाकौ", and will later under the rule "तद्राजस्य वहुषु तेनैवास्त्रियाम्", say इक्ष्वाकवः (in the plural)]. The Varttika here says that after a word denoting जनपद (country) and which is equally applied to a क्षत्रिय take

affixes as in अपत्याधिकार, to denote its king (राजनि अपत्यवत्)। This varttika follows from the technical significant name given to these affixes (i.e. तद्राज) by the rule "ते तद्राजाः"। Thus पञ्चालानां राजा = पाञ्चालः (with अञ्)। The word पूरु (denoting a क्षत्रिय class only) takes अण् in the sense of तद्राज, yielding पौरव। Again the word पाण्डु (denoting a क्षत्रिय and country also) takes ड्यण् in तद्राज senses. Thus we get पाण्ड्यः।

मित—। यः शब्दो 'जनपद' देशविशेषं तथा 'क्षत्रिय' क्षत्रियजातिं क्षत्रियराजं वा बोधयति, तस्मात् अपत्ये अञ् प्रत्ययो भवति—इति हि सूत्रार्थः। अनेन—इक्ष्वाकुर्नाम देशः, राजा च—इत्यस्मात् अञि सति 'दाण्डिनायन—' इति सूत्रेण टिलोपे ऐक्ष्वाकः सिध्यति। एते अञादयः प्रत्ययाः (ये अपत्यवत् राजनि अपि वर्त्तन्ते ते) तद्राजाः, एषां बहुवचने 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इति सूत्रेण प्रत्ययलोपो वक्ष्यते। तस्यैव स्फुटीकर्त्तुम् भट्टोजिरिह—'ऐक्ष्वाकः ऐक्ष्वाकौ' इति द्विवचनपर्य्यन्तमेव उदाहृतवान्, बहुवचने प्रत्ययलोपात् 'इक्ष्वाकवः' इति वक्ष्यति। अधुना वार्त्तिकमुदाहरति—यो जनपदशब्दः क्षत्रियार्थेन समानः तस्मादपत्यवत् राजनि अर्थे प्रत्यया भवन्ति। एवञ्च पञ्चालानां राजा इति अञि सति पाञ्चालः लभ्यते॥ पूरुशब्दात् जनपदवाचित्वाभावेऽपि क्षत्रियवाचित्वे सति यथा अण् प्रत्ययो भवति तदर्थमेव वार्त्तिकं कृतम्। तद्राजसंज्ञार्थं च वचनम्॥ पाण्डुशब्दस्य क्षत्रियदेशवाचिनः तस्य राजनि प्रत्ययार्थं वार्त्तिकम्। अस्यात्र देशादिवाचित्वादेव युधिष्ठिरपितृवाचित्वं नास्ति। तद्वाचित्वे तु पाण्डव एव स्यात्—"ऋष्यन्धकवृष्णिकुरुभ्यश्च" इत्यण्। शुभ्रादित्वात् ढगपि इति केचित्, अतः भारते "पाण्डवेयाः, पाण्डवाः" इति। पाण्डव इति 'तस्येदम्' इति अण् अपि।

११८७। साल्वेयगान्धारिभ्यां च ।४।१।१६९॥

दी—। आभ्यामपत्ये अञ्। "वृद्धेत्—" इति ञ्यङोऽपवादः। साल्वेयः। गान्धारः। तस्य राजन्यप्येवम्।

The affix अञ् is attached to the words साल्वेय and गान्धार as well in the sense of अपत्य। This thus bars the application of ञ्यङ् to these words due by the rule "वृद्धेत्कोसलाजादात् ञ्यङ्"। This rule will apply in the case of "its or his king as well".

मित—। साल्वेय-गान्धारिशब्दौ जनपदक्षत्रियवाचकौ। किन्तु एतौ वृद्धौ शब्दौ, आदेरचो वृद्धित्वात्। अतः आभ्याम् "वृद्धेत्कोसलाजादात्ञ्यङ्" इति ञ्यङ् प्रक्षतः। तं व्युदस्य अञ् विधानार्थं सूत्रं विधीयते। तथा च काशिका— "ताभ्याम् ञ्यङि प्राप्ते पुनरञ् विधीयते"।

११८८। द्व्यञ्मगधकलिङ्गसूरमसादण्। ४।१।१७०॥

दी—। अञोपवादः। द्व्यच्—आङ्गः। वाङ्गः। सौह्मः॥ मागधः। कालिङ्गः। सौरमसः। तस्य राजन्यप्येवम्।

Two-vowelled words that denote both a क्षत्रिय and a जनपद, also the words मगध, कलिङ्ग and सूरमस take the affix अण् in the sense of अपत्य and राजा as well.

मित—। सूत्रमिदम् औत्सर्गिकम् अञ् प्रत्ययं वारयित्वा अण् प्रत्ययं विदधाति। अङ्ग, वङ्ग, सुह्म—एते द्व्यचः—(क्षत्रियजनपदवाचिनश्च)।

११८९। वृद्धेत्कोसलाजादाञ्ञ्यङ्। ४।१।१७१॥

दी—। वृद्धात्—आम्बष्ठ्यः, सौवीर्यः। इत्—आवन्त्यः, कौन्त्यः। कौसल्यः। अजादस्यापत्यमाजाद्यः। (राजन्यप्येवम् ?)।

वृद्ध words, इकारान्त words and the words कौसल and अजाद denoting a जनपद and क्षत्रिय take ञ्यङ् in the sense of अपत्य and राजा। Examples (i. e. आम्बाष्ठ etc) are clearly given in the Text.

मित—। जनपदक्षत्रियवाचकात् वृद्धात् शब्दात् इकारान्तात् शब्दात्, तथा कोसलाजादशब्दाभ्यां च अपत्ये (राजनिअपि) ञ्यङ् प्रत्ययो भवति। अन्यत् स्पष्टं मूले। एते जनपदक्षत्रियोभयवाचकाः॥ "इत्" इत्यत्र तपरकरणं किमर्थम्?—कुमारी नाम जनपदक्षत्रियवाचकशब्दः, तस्यापत्यम् इति कौमार (अञ्), न तु ञ्यङ्।

११९० । कुरुनादिभ्यो ण्यः । ४।१।१७२ ॥

दी—। कौरव्यः। नैषध्यः। 'स नैषधस्यार्थपतिः' इत्यादौ शैषिकोऽण्।

The word कुरु and words having initial (आदि) नकार and denoting क्षत्रिय and जनपद both—take the affix ण्य in the sense of अपत्य and राजा। Thus कौरव्यः, नैषध्य, नैपथ्य &c; and कौरव्य' राजा &c. How then do we get नैषधस्य in "स नैषधस्य" &c. This is formed as निषध + अण = नैषध by the rule "तस्येदम्"।

मित—। जनपद-क्षत्रियवाचकात् कुरुशब्दात् तथा नकारादि-शब्देभ्यः राजनि अपत्ये च ण्य-प्रत्ययो भवेत्। अणञोरपवादः।

११९१ । साल्वावयव-प्रत्यग्रथ-कलकूटाश्मकादिञ् ।४।१।१७३॥

दी—। साल्वो जनपदस्तदवयवा उदुम्बरादयः तेभ्यः, प्रत्यग्रथादिभ्यस्त्रिभ्यश्च इञ्। अञोऽपवादः। औदुम्बरिः। प्रात्यग्रथिः। कालकूटिः। आश्मकिः। राजन्यप्येवम्।

Words which are parts & parcels of the vast country denoted by साल्व (i. e. उदुम्बर, तिलखल, मद्रकार, युगन्धर, भूलिङ्ग, शरदन्त) and the three words प्रत्यग्रथ, कलकूट, अश्मक—all denoting both क्षत्रिय and जनपद take the affix इञ् in the sense of अपत्य and

राजा। Thus we get औदुम्बरिः, प्रात्यग्रथिः, कालकूटिः, आश्मकि &c. This rule bars the usual अञ् here.

मित—। जनपदक्षत्रियोभयवाचकात् इति वर्त्तते एव। साल्वा नाम क्षत्रियाः। तस्य अपत्यम इति साल्व + ढक् (द्व्यचः इति ढक्) = साल्वेयः। औत्सर्गिकः अणपि इष्यते, तेन साल्वः। तदवयवा उदुम्बरादयः (तदयथा— "उदुम्बरास्तिलखला मद्रकारा युगन्धराः। भुलिङ्गा शरदन्ताश्च साल्वावयवसंज्ञिताः॥"— केषाञ्चिन्मते आजमीढ़ अजक्रन्द अपि), तेभ्यः क्षत्रियप्रवृत्तिभ्यः, प्रत्यग्रथादिभ्यः त्रिभ्यः इञ प्रत्ययविधानं राजनि अपत्ये च। अन्यत् स्पष्टं मूले॥

११८२। ते तद्राजाः॥ ४।१।१७४॥

दी—। अञादय एतत्संज्ञाः स्युः।

११८३। तद्राजस्य बहुषु तेनैवास्त्रियाम्। २।४।६२॥

दी—। बहुष्वर्थेषु तद्राजस्य लुक् स्यात् तदर्थकृते बहुत्वे न तु स्त्रियाम्। इक्ष्वाकवः। पञ्चालाः इत्यादि॥ कथं तर्हि— 'कौरव्याः पशवः,' 'तस्यामेव रघोः पाण्ड्याः' इति च? कौरव्ये पाण्ड्ये च साधव इति समाधेयम्॥ 'रघूणामन्वयं वक्ष्ये', 'निरुध्यमाना यदुभिः कथञ्चित्' इति तु रघुयदुशब्दयोः तदपत्ये लक्षणया।

The affixes अञ् etc that are here enjoined after जनपदक्षत्रिय-वाचकशब्द in the sense of अपत्य and राजा (e. g. "जनपदशब्दात् क्षत्रियादञ्" &c) are called तद्राज affixes. And these तद्राज affixes elide if plurality due to these affixes is intended and there is no reference to femenine gender' Thus we get इक्ष्वाकवः, पञ्चालाः &c with elision of अञ् in the

plural. If this be the case then how do we get "कौरव्याः पशवः", "पाण्ड्याः" &c. in the plural with तद्राज affixes not elided ? The answer is that in such cases we are to add यत् after the base कौरव्य and पाण्ड्य (singular) by the rule "तत्र साधुः" । Now this new word (कौरव्य + यत् =) कौरव्य being no longer ending in a तद्राज affix, this will not elide in the plural. Again रघु, यदु though refers to kshatriyas yet they are not जनपदवाची and as such they cannot take तद्राज affix, how then are these used in the plural but without any तद्धितप्रत्यय with reference to descendants of रघु and यदु ? To this Bhattoji answers by saying that no प्रत्यय is used after these, but by transference (लक्षणा), they refer to the progeny of रघु and यदु ।

मित— । "जनपदशब्दात् क्षत्रियादञ्" इतोत्रवमादयः प्रत्ययाः सर्वनाम्ना ('ते'—इत्यनेन) परामृश्यन्ते ; न तु तत्पूर्वा अपि । अत आह—"अञादय एतत्संज्ञाः स्युः" । एवं तद्राजप्रत्ययार्थकृतवहुत्वे द्योत्ये तद्राजप्रत्ययस्य लुक् स्यात्, न तु स्त्रियाम् । ततः (वहुषु) इक्ष्वाकवः, पञ्चालाः (प्रत्ययविरहिताः सन्तः) सिध्यन्ति ॥ "कौरव्याः पशवः", "पाण्ड्याः"—इत्यत्र तद्राज—ण्य-प्रत्ययः, ड्यण्—प्रत्ययश्च अस्ति, तत् कथं एषां वहुत्वे प्रत्ययलोपविरहः ? इत्याशङ्क्याह—कौरव्यशब्दात् पाण्ड्यशब्दाच्च पुनः "तत्र साधुः" इति सूत्रेण यत्—प्रत्ययं कृत्वा कौरव्यशब्दः पाण्ड्यशब्दः सिध्यति । अनयोः वहुत्वे यत्-प्रत्ययस्य तद्राजत्वाभावात् लोपो न ; अत आह—"कौरव्याः पाण्ड्याः च साधव इति समाधेयम्" ॥ "ननु—रघु यदुशब्दयोः जनपदवाचित्वाभावात् प्राग्दीव्यतीये अणि तस्य तद्राजत्वाभावात् कथं वहुषु 'रघूणामन्वयं वक्ष्ये'—इत्येवमादिषु तस्य लुक् स्यात् ? इत्याशङ्क्याह—रघु—यदुशब्दौ लक्षणया तदपत्ये वर्त्तेते, न तु प्रत्ययः क्रियते । एतदभिप्रेत्य भट्टोजिराह—"रघुयदुशब्दयो स्तदपत्ये लक्षणया" ।

११८४ । कम्बोजाल्लुक् ।४।१।१७५ ॥

दी—। अस्मात् त्‌द्राजस्य लुक्। कम्बोजः—कम्बोजौ। "कम्बोजादिभ्य इति वक्तव्यम्" (वा—)। चोलः, शकः—द्व्यज्लक्षणस्य अणो लुक्। केरलः, यवनः—अञो लुक्। 'कम्बोजाः समरे' इति पाठः सुगमः। दीर्घपाठे तु—कम्बोजोऽभिजनो येषाम् इत्यर्थः। "सिन्धुतक्षशिलादिभ्योऽणञौ" (सूत्र १४७२)—इत्यण्।

The तद्राज affix elides after the word कम्बोज (even though plurality due to तद्राजप्रत्यय is not intended). Thus we get कम्बोजः—कम्बोजौ &c—with elision of तद्राजप्रत्यय even in singular & dual,—(hence instances of singular and dual only are given by Bhattoji).

Now the varttika says that this elision is after words of the कम्बोज class i.e., after कम्बोज, चोल, शक, केरल, यवन। Thus we get चोलः, शकः with elision of तद्राज अण् due by "द्व्यच् मगध—" in singular &c. And केरलः यवनः with elision of तद्राज अञ् &c. Sometimes we find intances like "काम्बोजाः समरे" &c; but Bhattoji says that here the reading "कम्बोजाः समरे" is rather admissible and easily intelligible. If we are at all to support the दीर्घ पाठ as काम्बोज, then let us proceed thus—कम्बोजः (देशः) अभिजनः (पूर्वनिवासः) येषाम् इति कम्बोज + अण् = काम्बोजाः। Here the affix अण् is not तद्राज but is guided by the rule "सिन्धुतक्षशिलादिभ्यः अणञौ"। So this अतद्राज affix will not at all elide and we will get काम्बोजाः &c.

मित—। जनपदशब्दात् क्षत्रियात् इति विहितस्य अञो लुक्। अबहुत्वार्थमेव सूत्रम्, अत उदाहरति "कम्बोजः, कम्बोजौ"। अधुना वार्त्तिकमाह—"कम्बोजादिभ्य

लुग्वचनं चोलाद्यर्थम्" । सर्वमेतत् मूले स्पष्टम् ॥ कथं काम्बोजाः इति दीर्घपाठः दृश्यते, अनेन तद्राजप्रत्ययस्य लुक् प्रसङ्गात् ? इत्यत्राह—"कम्बोजाः समरे' इति ह्रस्वपाठ एव सुगमः" । दीर्घपाठे तु 'सोऽस्य अभिजनः' इत्यर्थे—"सिन्धु तक्षशिलादिभ्योऽणञौ" इति अण्प्रत्ययेन साधनीयः, ततः अस्य तद्राजत्वाभावात् वर्त्तमानसूत्रेण लुक् न स्यात्, "काम्बोजाः" इति च सिध्येत् ।

११८५ ॥ स्त्रियामवन्तिकुन्तिकुरुभ्यश्च । ४।१।१७६ ॥

टी— । तद्राजस्य लुक् स्यात् । अवन्ती, कुन्ती, कुरूः ।

The तद्राज affix will elide in the feminine gender after these words—अवन्ति, कुन्ति, कुरु । अवन्तेः कुन्तेः अपत्यं स्त्री राजा वा इति इत्लक्षणस्य ञ्यङ्-प्रत्ययस्य लुकि सति "इतो मनुष्यजातेः "इति ङीष् । कुरूः इत्यत्र ण्यप्रत्ययस्य लुक्, ततः स्त्रियामूङ् ।

११८६ । अतश्च ।४।१।१७७ ॥

टी— । तद्राजस्य अकारस्य स्त्रियां लुक् स्यात् । शूरसेनी । मद्री । कथं 'माद्रीसुतौ' इति ?—'ह्रस्व एव पाठ' इति हरदत्तः । भर्गादित्वं वा कल्प्यम् ।

The अकार of a तद्राज affix elides in the feminine. Thus शूरसेनस्य अपत्यं स्त्री = शूरसेन + अञ् (अकार of तद्राजप्रत्यय) = शौरसेन + ङीष् (अपत्यप्रत्ययेनजातित्वात्) = शूरसेनी (अकारप्रत्ययस्य लुक्) । एवं मद्री । How then do we get माद्रीसुतौ with दीर्घ in माद्री ? Haradatta says—That the reading should be मद्री with (ह्रस्व-अकार) ; or we may defend माद्री without elision of तद्राजप्रत्यय in fem. by including it under the भर्गादि list (after which तद्राज affix do not elide—see the next rule).

मित— । सुगमा ॥

११९७। न प्राच्य-भर्गादि-यौधेयादिभ्यः। ४।१।१७८॥

दी—। एभ्यस्तद्राजस्य न लुक्। पाञ्चाली, वैदर्भी, आङ्गी वाङ्गी, मागधी—एते प्राच्याः। भार्गी, कारूषी कैकेयी। 'केकयी' इत्यत्र जन्यजनकभावलक्षणे पुंयोगे ङीष्। 'युधा', 'शुक्रा'—आभ्यां 'द्व्यचः' इति ढक्; ततः स्वार्थे 'पर्श्वादि यौधेयादिभ्योऽणञौ' इत्यञ्। 'शार्ङ्गरवाद्यञः—' इति ङीन्। 'अतश्च' इति लुकि तु ढगन्तत्वात् ङीपि उदात्तनिवृत्तिस्वरः स्यात्। यौधेयी, शौक्रेयी।

The तद्राज affix do not in the fem. elide after जनपदक्षत्रियवाचक words denoting प्राच्यक्षत्रिय or after words of the भर्गादि group or after words of the यौधेयादि class. Thus पाञ्चाली (प्राच्यक्षत्रिय), भार्गी कैकेयी (भर्गादि group) etc. In the case of केकयी however there is पुंयोगे ङीष् after the base केकय denoting जन्यजनक relation (cp. "केकयीतः प्राक् भरतस्ततोऽभूत्", "केकयुग्रपत्न्न' वत वह्ननर्थम्"—Bhatti). यौधेयी, शौक्रेयी are got even without this rule, as युधा + ढक् = यौधेय, यौधेय + अञ् (स्वार्थे) = यौधेय, (see Text); now though this स्वार्थिक अञ् [which is also तद्राज affix by the rule "ञ्यादयस्तद्राजाः(५।३।११९)] elides by "अतश्च,', still then ङीप् by "टिड्ढाणञ्—"will operate, for यौधेय ends in ढक् yielding the desired result यौधेयी; but then its स्वर will be उदात्त at the end; whereas if we establish यौधेयी in the way described in the Text i.e. with शार्ङ्गरवादि ङीन्, then its स्वर will be आद्युदात्त। And for this difference it is separately mentioned in this sutra.

मित—। प्राच्येभ्यः, भर्गादिभ्यः (भर्ग, करूश, केकय, कश्मीर, साल्व, सुस्थाल, उरस्, कौरव्य), यौधेयादिभ्यः (यौधेय, शौक्रेय, शौभ्रेय, ज्यावाणेय, धौर्तेय, धार्तेय,

त्रिगर्त्त, भरत, उशीनर)—उत्पन्नस्य तद्राजस्य स्त्रियां लुक् न स्यात् ॥ यौधेयादिभ्यः स्त्रियां लुक्प्रतिषेधं दर्शयितुमाह—युधा, शुभ्रा आभ्यां 'द्व्यचः' इति ढक् इत्यादि। यद्यपि अत्र सूत्रे अनुक्तत्वादपि (युधा + ढक् = यौधेय ; ततः स्वार्थिक अञ् ; तस्य तद्राजत्वात् "अतश्च" इति लुक्, ततः) ढकप्रत्ययान्तत्वात् "टिड्‌ढाणञ्—" इति ङीपि यौधेयी सिध्यति, तथापि स्वरविशेषार्थम् अत्र पाठः कल्पितः। "अतश्च" इति लुकि ङीपि सति "उदात्तनिवृत्तिस्वरः स्यात्"—आद्यस्वरः अनुदात्तः स्यात्। किन्तु स्वार्थिके अञि सति ततःङीनि आद्युदात्तत्वं स्यात्। अतो विशेषविहितार्थं पृथक् पाठः स्वीकृतः ॥ अस्मादेव ज्ञापकात् पर्श्वाद्यणञोः पाञ्चमिकस्यापि (पञ्चमाध्यायपठितस्यापि) तद्राजसंज्ञेण "अतश्च" इत्यनेन लुक् प्राप्नोति, पर्श्वादि-अणः स्त्रियां लुक् सिद्धो भवति वा। तदेव लुक्विधानं वर्त्तमानसूत्रेण वार्य्यते इति बोध्यम्।

११९८। अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ।४।१।७८

टी—। त्र्यादीनामन्त्यमुत्तमम्, तस्य समीपमुपोत्तमम्। गोत्रे यौ अणिञौ विहितौ अनार्षौ तदन्तयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः स्यात्। 'निर्दिश्यमानस्यादेशा भवन्ति' (परिभाषा), इत्यणिञोरेव। षङावितौ। 'यङश्चाप्' (सूत्र ५२८)। कुमुदगन्धेरपत्यं कौमुदगन्ध्या। वाराह्या। 'अनार्षयोः' किम्? वासिष्ठी, वैश्वामित्री। 'गुरूपोत्तमयोः' किम्? औपगवी। जातिलक्षणे ङीष्। 'गोत्रे' किम्?— अहिच्छत्रे जाता—आहिच्छत्री।

The words having three or more letters and that have a long penultimate vowel and ending in the गोत्रप्रत्यय-अण् or इञ् (but these not signifying any ऋषि), will take ष्यङ् in the fem., and then आप् in the fem. will come in by the rule "यङश्चाप्" (sutra 528 ante). [N. B.—Note that उत्तम means

the final of three or more letters, and उपोत्तम means the very near this final i.e., the penultimate, Bhattoji says all this by "आदीनाम् अन्त्यमुत्तमम्. अस्यसमीपमुपोत्तमम्"] । Again this ष्यङ् will come in place of अण् and इञ only by the परिभाषा "निर्दिश्यमानस्या-देशा भवन्ति" ॥ Why do we say अनार्षयोः ? Witness वासिष्ठी (where अण् being आर्ष अण् does not take ष्यङ् in the fem). Why do we say गुरूपोत्तमयोः ? Witness औपगवी (where the penultimate not being a long vowel, ष्यञ् cannot come in the fem), but we have जातिलक्षणङीष् "by गोत्रं च चरणैः सह" (see स्त्रीप्रत्यय) ; why again do we say गोत्र here ? witness आहिच्छत्री (with टिड्ढाणञ्— इति ङीप्) ; here अण् not being in sense of अपत्य or गोत्रापत्य, ष्यङ् can not come in the feminine.

मित—। गोत्रे यौ अणिञौ विहितौ अनार्षौ, तदन्तयोः प्रातिपदिकयोः गुरूपो-त्तमयोः स्त्रियां ष्यङादेशो भवति। किमेतत् 'गुरूपोत्तमम्' नाम' इत्याह—' आदीनाम् त्रिप्रभृतीनाम् 'अन्त्यम्' अन्त्याक्षरम् 'उत्तमम्' तदाख्यं भवति, तस्य समीपम् इति उपोत्तमम् (सामीप्ये अव्ययीभावः)। अन्त्यात् अव्यवहितपूर्वम् इत्यर्थः ॥

ष्यङः अनेकाल्त्वादपि "निर्दिश्यमानस्यादेशा भवन्ति" इति परिभाषया अत्र अणिञोरेव ष्यङ्, न तु तदन्तयोः समुदायस्य। न च 'ङिच्च' इति सूत्रेण अन्त्या-देशोऽयत्र स्यात् इति बोध्यम्। एवम् कुमुदगन्धेरपत्यम् इत्यर्थे 'तस्यापत्यम्' इति अणि कुमुदगन्धि + अण् = कौमुदगन्धः। ततः स्त्रीप्रत्यये सति, अनेन अणोःस्थाने ष्यङ् (य) = कौमुदगन्ध्य, ततः 'यङश्चाप्' इति चापिसति कौमुदगन्ध्या। अधुना इञि उदाहरणमाह—वराहस्यापत्यम् इति वराह + इञ् ("अतइञ्") = वाराहिः। तस्यस्त्री इति इञः स्थाने ष्यङ् ततः चाप् = वाराह्या। एवं बालाक्या॥ वाशिष्ठी ऋष्यण्। वैश्वामित्री इत्यपि ऋष्यण्। किन्तु यदा विश्वामित्रः मन्त्रदृष्टा न भवति

तदा "अत इञ्" इति इञि सति वैयासिकि: स्यात् [तथा च भारतम् "अष्टकस्य वैश्वामित्र:" इत्यादि] ॥ अन्यत सुगमम् ॥

१११९ । गोत्रावयवात् । ४।१।७९ ॥

दी— । गोत्रावयवा गोत्राभिमता: कुलाख्या:, ततो गोत्रे विहितयो: अणिञो: स्त्रियां ष्यङादेश: स्यात् । अगुरूपोत्तमार्थं आरम्भ: । पौणिक्या । भौणिक्या ।

Bhattoji in order to explain the word गोत्रावयव as occuring in the sutra says that words that specify or siginfy some well-known races are गोत्रावयव (i.e. पुणिक, भुणिक, मुखर etc) ; and if अण् or इञ् in the sense of गोत्र are attached after such गोत्रावयव words, then in the fem. these will take ष्यङ्, no matter the words are not गुरूपोत्तम । Thus we get पुणिकस्य अपत्यं इति पुणिक + इञ् = पौणिकि । Then in fem. पौणिकि + ष्यङ् आप् = पौणिक्या । Similarly भौणिक्या, मौखर्या &c.

मित— । 'अणिञो:' इति अस्त्येव । गोत्रावयवशब्दं व्याचष्टे—गोत्रं कुलम् अभिमतं प्रख्यातं कुलम् आख्यान्तियै इति कुलाख्या: शब्दा:, कुलनामानि इत्यर्थ:, पुणिक- भुणिक-मुखरादय:, "ततो गोत्रे विहितयोरणिञो: स्त्रियां ष्यङादेश: भवति" । अन्यत् स्पष्टम् मूले ।

१२०० । क्रौड्यादिभ्यश्च ।४।१।८० ॥

दी— । स्त्रियां ष्यङ्प्रत्यय: स्यात् । अगुरूपोत्तमार्थ: अनणिञन्तार्थश्च आरम्भ: । क्रौड्या । व्याड्या । 'सूत युवत्याम्' सुत्या । 'भोजक्षत्रिये' —भोज्या ।

To words of the क्रौड़ि—class, ष्यङ् comes in the fem. (though these are not गुरूपोत्तम or अणन्त वा इञन्त) । The word सूत takes ष्यङ् in fem. to denote a युवति &c. and भोज to denote a क्षत्रिय ।

मित—। सुगमा। क्रौड्‌यादिगणो यथा—क्रौड़ि, लाडि, व्याड़ि, आपिशलि, आपक्षिति, चौपयत, चैटयत, सैकयत, बैल्वयत, सौधातकि, सूतयुवत्याम्, भोज क्षत्रिये, यौतकि, कौटि, भैरिकि भौलिकि, शाल्मलि, शालास्थलि, कापिष्ठलि, गौकक्ष्य ॥

१२०१। दैवयज्ञि-शौचवृक्षि-सात्यमुग्रि-काण्ठेविद्धिभ्यो-ऽन्यतरस्याम्। ४।१।८१ ॥

टी—। एभ्यश्चतुर्भ्यः ष्यङ् वा। अगोत्रार्थमिदम्, गोत्रेऽपि परत्वात् प्रवर्तते। पक्षे 'इतो मनुष्यजातेः' इति ङीष्। दैवयज्ञ्या—दैवयज्ञी। इत्यादि ॥

The four words दैवयज्ञि etc (that end in the affix इञ्) optionally takes ष्यङ् in the feminine. This sutra is both for गोत्रार्थ and अगोत्रार्थ senses; optionally when this sutra does not operate these words take ङीष् in the fem. by the rule 'इतो मनुष्यजातेः'। Thus देवयज्ञस्य अपत्यम् इति देवयज्ञ + इञ् = दैवयज्ञि। ततः ष्यङ् आप् = दैवयज्ञ्या। ङीषितु—दैवयज्ञी। एवम् शुचिवृक्षस्य अपत्यं स्त्री = शौचिवृक्ष्या—शौचिवृक्षी। सत्यमुग्रस्य अपत्यं स्त्री = सात्यमुग्र्या—सात्यमुग्री इत्यादि ॥

मित—। दैवयज्ञि, शौचवृक्षि, सात्यमुग्रि, काण्ठेविद्धि इत्येतेषां चतुर्णाम् अन्यतरस्यां (विकल्पेन) ष्यङ् प्रत्ययो भवति स्त्रियाम्। इञन्ता एते। गोत्रग्रहणं चात्र न वर्त्तते। तेन उभयत्रविभाषा इयम्। गोत्रे पूर्वेण ष्यङादेशः प्राप्तो विकल्प्यते, अगोत्रे अनन्तरे अपत्ये पक्षे विधीयते। तेन मुक्ते—'इतोमनुष्यजातेः' इति ङीषेव भवति। ततः दैवयज्ञ्या-दैवयज्ञी काण्ठेविद्ध्या—काण्ठेविद्धी इत्यादि सिध्यति। अन्यत् सुगमम् ॥

इति तद्धितापत्याधिकारप्रकरणे श्रीकमुदरञ्जनकृता मितभाषिणी-व्याख्या समाप्ता ॥